सावधानाः स्याम

• चमू कृष्णशास्त्री

संस्कृतभारती
देहली

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सावधानाः स्याम

चमू कृष्णशास्त्री

संस्कृतभारती
देहली

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशनम् -
संस्कृतभारती
माता मन्दिर गली, झण्डेवाला
नई दिल्ली - ११० ०५५

© प्रकाशकस्य एव ।

प्रथममुद्रणम्, २००९ - ३०००

मूल्यं - २० रू

मुद्रणम् -
प्रिन्टेक इन्टरनेशनल, बी-३६, डी.एस.
आई.डी.सी. कॉम्प्लेक्स, झिलमिल
इन्डस्ट्रीयल एरिया, नई दिल्ली- ६५

ISBN 978-81-87276-48-7

SAAVADHAANAAH SYAAMA - A collection of inspiring articles written by Krishna Shastry C.M. Publisher - **SAMSKRITA BHARATI** Mata Mandir Gali, Jhandewala, New Delhi - 110 055

Pages - iv + 88 Price - Rs. 20.00 First print - Sept - 09
Printed at : Printech International, B-36, DSIDC Complex, Jhilmil Industrial Area New Delhi-95

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रास्ताविकं किञ्चित्

प्रत्यक्षदर्शनात् अपि बहुत्र यथार्थज्ञानं यथा न भवेत् तथैव भवति अवगतिविषये अपि । यथा अस्माभिः अवगतं स्यात् तथैव न भवेत् वस्तुतत्त्वम् । सूक्ष्मेक्षिकया दर्शनात् एव वस्तुतत्त्वज्ञानं भवेत् । तत्रापि गूढेङ्गितानां कार्याणां तत्त्वस्य अवगमनं तु सर्वथा दुष्करम् । सूक्ष्मेक्षिकावान् कश्चित् यदा अस्मान् प्रबोधयेत् तदा एव वयं तत्त्वम् अवगच्छेम ।

संस्कृतसम्बद्धान् बहून् विषयान् सूक्ष्मेक्षिकया पश्यन् मान्यः कृष्ण-शास्त्रिवर्यः लेखानां द्वारा अस्मान् काले काले प्रबोधयति । सम्भाषण-सन्देशे प्रकाशिताः तादृशाः लेखाः पुस्तकेऽस्मिन् सङ्गृहीताः ।

अत्र केचन लेखाः यद्यपि प्रसङ्गविशेषं निमित्तीकृत्य लिखिताः, तथापि तेषां सार्वकालिकता तु स्वतःसिद्धा एव । अतः तादृशेषु लेखेषु उक्तानां वर्षसङ्ख्यादीनाम् अविवक्षितततां परिभाव्य ते लेखाः पठनीयाः । ते अस्माकं प्रेरणायै भवेयुः एव इत्यत्र तु नास्ति सन्देहः ।

अस्माकम् अवगमनं, चिन्तनरीतिः, दृष्टिः, अनुभवः, वाणी, कृतिः, बोधनक्रमः, आयतिः इत्यादीन् अधिकृत्य सन्ति अत्रत्याः लेखाः सर्वे । एतेषां पठितृषु एकैकः अपि चिन्तयेत् यत् लेखाः एते माम् अभिलक्ष्य एव लिखिताः स्युः इति । सर्वेषां मर्मस्पर्शिता एतेषां सर्वेषां लेखानां वैशिष्ट्यम् ।

एतस्य लेखसङ्ग्रहस्य प्रकाशने सहकृतवन्तः सर्वे कृतज्ञतापूर्वकं स्मर्यन्ते अस्माभिः ।

विरोधिसं ।। भाद्रपदकृष्णनवमी — *प्रकाशकः*

१३.९.२००९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनुक्रमणिका

१. सङ्ख्या उत स्तरः ? १
२. संस्कृतज्ञेषु निवेदनम् ७
३. फलप्राप्तिपर्यन्तम् १३
४. वरदानम् उत अभिशापः ? १७
५. भाषाशुद्धिः अपि चिन्तनीया २३
६. अस्माकं श्रद्धाविश्वासौ स्याताम् २८
७. किम् एतैः प्रताडनैः नालम् ? ३४
८. महत्ता स्वनाम्नः लोपे ३९
९. संस्कृतेन अनुवादः समयस्य आवश्यकता ४३
१०. संस्कृतभारतीकार्यं भवतः स्थाने अस्ति किम् ? ४८
११. 'क्लासिकल् लांग्वेज्' लाभः उत हानिः ? ५५
१२. सावधानाः स्याम ६६
१३. भाषाशिक्षणम् उत विषयशिक्षणम् ? ७२
१४. २००१ वर्षस्य जनगणना, संस्कृतं च ७८
१५. माध्यमानाम् उपयोगः ८४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१.

सङ्ख्या उत स्तरः ?

अहं 'राजस्थानपत्रिका'नामकस्य वार्तापत्रस्य स्वामिना सम्पादकेन श्रीमता गुलाबकोठारीमहोदयेन सह जयपुरे सम्भाषणं करोमि स्म । तेन उक्तं - ''गीताशिक्षणकेन्द्राणां द्वारा दशसहस्त्रं जनाः शिक्षणं प्राप्नुयुः इत्येषः अंशः न महत्त्वभूतः । प्रत्युत दश जनाः विद्वांसः भवेयुः चेदपि भवतां प्रयत्नः भवेत् सार्थकः । अतः विदुषां निर्माणे प्रयत्नः विधीयताम्'' इति । तम् एव पक्षं समर्थयति 'वरमेको गुणी पुत्रो न च मूर्खशतान्यपि' इत्येषा प्राचीना उक्तिः । अद्य संस्कृतज्ञानां संस्कृतच्छात्राणां च सङ्ख्या स्तरः चेति विषय-द्वयम् अपि अस्माभिः गभीरतया चिन्तनीयम् अस्ति, यस्मात् ऋते संस्कृतस्य उन्नतिः असम्भवा ।

प्रजाप्रभुत्वे संख्याबलमेव बलम् इति तु सत्यम् । प्रतिदशवर्षं राष्ट्रियजनगणनासमये विविधभाषाभाषिणां संख्या गण्यते । ततः प्राप्ता अखिलभारतीया संस्कृत-सम्बद्धा संख्या -

१९७१	-	२२१२
१९८१	-	६१०६
१९९१	-	४९, ७३६
२००१	-	१४,१३५

एतस्याः आवल्याः परिशीलनात् स्पष्टं भवेत् यत् एषा सङ्ख्या एकैकस्मिन् प्रसङ्गे एकैकविधा दृश्यते इति । एषा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संख्या एव पुनः इतरभापाभाषिणां संख्यया सह तोल्यते । तदा सहजतया संस्कृतम् अगण्यस्थानं प्राप्नुयात् एव खलु । यतः एषा एव संख्या यदा प्रतिशतपरिमाणेन दृश्येत तदा तत् परिमाणं भवेत् ०.०१ % इत्यस्मात् अपि न्यूनम् !! इदानीं तु संस्कृतम् अनुरागबलेन जीवति, न तु संख्याबलेन। एतत् वहुकालं यावत् न अनुवर्तेत ।

गतेषु १० - २० वर्षेषु नूतनतया बहवः संस्कृतविश्वविद्यालयाः सञ्जाताः । विश्वविद्यालयानुदानायोगस्य मान्यतायाः प्राप्त्यर्थं तैः विश्वविद्यालयैः छात्रसङ्ख्या वर्धनीया एव । शास्त्रि-आचार्यादिषु कक्ष्यासु शास्त्रस्य अध्येतॄणां सङ्ख्या कथं वा वर्धेत ? 'डिप्लोमा'कक्ष्याभिः, अन्याभिः सामान्याभिः कक्ष्याभिः वा छात्रसङ्ख्या प्रदर्शनीया एव भवति ।

देशे उपपञ्चसहस्राः संस्कृतपाठशालाः सन्ति । पाठशालाभिः सर्वकारस्य अनुदानं प्राप्तव्यं चेत् न्यूनतमा छात्रसङ्ख्या प्रदर्शनीया भवत्येव । अपेक्षितसङ्ख्यकानां छात्राणाम् अभावे पाठशालायाः अस्तित्वरक्षणाय कः सरलः मार्गः ? वास्तविकतया दश छात्राः सन्ति चेत् पञ्जिकायां शतस्य छात्राणां नामाङ्कनम् (१:१० अनुपातेन), शिक्षाविभागस्य निरीक्षकस्य आगमनदिने समीपवर्तिनः सामान्यविद्यालयस्य छात्राणाम् आनयनं, निरीक्षकाय दक्षिणादानं चेति एकः एव मार्गः । अन्यथा संस्कृतविद्यालयः पिहितः भवेत् ! समाजजागरणं कृत्वा छात्रसङ्ख्यावर्धनाय पर्वतारोहणसदृशं श्रमसाध्यं कार्यं को वा कर्तुम् उत्सहेत ?

छात्रसङ्ख्या पर्याप्ता नास्ति चेत् शिक्षकनियुक्तिः न भवति, नियुक्ततायां जातायां सत्याम् अपि स्थायिता न भवेत् । विविधानां शास्त्राणाम् अध्ययनाय प्रतिशास्त्रं छात्रसङ्ख्या अपेक्षिता । साहित्यस्य व्याकरणस्य च अध्येतारः प्राप्यन्ते, न तु इतरशास्त्राणाम् । पत्रकाराः अपि सर्वदा कञ्चिदेकं प्रश्नं पृच्छन्ति एव - छात्रसङ्ख्या हीयमाणा उत वर्धमाना इति । एवंप्रकारेण सङ्ख्यायाः महत्त्वम् अस्त्येव ।

परम् एतत् दृश्यम् अवलोक्यताम् । सद्यः कस्यचन संस्कृतविश्वविद्यालयस्य वार्षिकी परीक्षा संवृत्ता । गते वर्षे तत्र मार्कि १,४५,००० परीक्षार्थिनः आसन् । ऐषमं वर्षे मार्कि १,९५,०००

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परीक्षार्थिनः । एकवर्षाभ्यन्तरे २५% सङ्ख्यावृद्धिः । संस्कृतस्य कियती उन्नतिः इति भ्रमलोके मा भूयताम् । तस्य विश्वविद्यालयस्य कश्चन सम्बद्धः महाविद्यालयः, यश्च पञ्चानां जनानाम् उपवेशनाय योग्ये एकस्मिन् प्रकोष्ठे 'विराजते' तस्मिन् महाविद्यालये 'पञ्चसहस्त्रं' संस्कृतच्छात्राः ! (५००० इति अङ्कैः (सङ्ख्यया) लिख्यते चेत् मुद्रणदोषः इति वाचकाः चिन्तयेयुः इति हेतोः 'पञ्चसहस्त्रम्' इति अक्षरैः लिखितम् !) अत्र अल्पा अपि अतिशयोक्तिः नास्ति । साधारं लिख्यते एतत् । परीक्षानिरीक्षकैः वीक्षणार्थं यदा परीक्षाकेन्द्राणि गतानि तदा विभिन्नकेन्द्रेषु आहत्य अष्टादश परीक्षार्थिनः पृष्टाः 'भवतः महाविद्यालयः कः ?' इति । तदा तेषु एकादश परीक्षार्थिनः स्वस्य महाविद्यालयस्य नाम वक्तुं न शक्तवन्तः ! (यतः ते सर्वे कदापि महाविद्यालयं न गतवन्तः, प्रमाणपत्रविक्रेतृगणस्य सदस्यानां मध्यवर्तिनां च द्वारा परीक्षाप्रकोष्ठम् आगतवन्तः ।) व्यवस्था एवम् अस्ति इति श्रूयते - प्रतिलिपिकरणाय पूर्वसज्जम् उत्तरपत्रं परीक्षार्थिने दत्तं चेत् तदर्थं परीक्षार्थिना २०००/- रूप्यकाणि दातव्यानि ! उत्तरपत्रमेव विलिख्य दातव्यं चेत् ५०००/- रूप्यकाणि !! उत्तमेन विदुषा उत्तरं लेखयित्वा दातव्यं चेत् १०,०००/- रूप्यकाणि !!! एवं 'विपण्यां' मूल्यं भिन्नं भिन्नम् अस्ति । यस्मिन् दिने परीक्षासु प्रतिकृतिकरणं कठोरतया निषिध्येत तस्मिन् दिने ६०% संस्कृतपाठशालाः पिहिताः भवेयुः ।

बह्वीनां पाठशालानां शिक्षकाणां दुःखं यत् परीक्षासु उत्तरलेखनाय छात्राणां पुरतः पाठ्यपुस्तकम् उद्घाट्य उत्तरं कुत्र अस्तीति प्रदर्श्यते चेदपि ते उत्तरं लेखितुं न शक्नुवन्ति इति ! यदि शिक्षकाः आवर्षं स्वच्छात्रान् स्वीकृत्य धनार्जनाय पूजादिकम् अनुष्ठानानि चैव कारयन्तः भवेयुः, न च पाठयेयुः तर्हि परीक्षासु छात्राः किम् अधिकं कर्तुं शक्नुयुः ?

केवलं सामान्यानां पाठशालानाम् एव एषा स्थितिः इति मा चिन्त्यताम् । कस्यचन प्रतिष्ठितस्य विश्वविद्यालयस्य (सर्वविषयाणां विश्वविद्यालयस्य) प्रतिष्ठितसंस्कृतविभागस्य कश्चन शोधच्छात्रः । शोधनिबन्धसमर्पणानन्तरं मौखिकपरीक्षासमये तेन दशसहस्त्रस्य रूप्यकाणाम् आवश्यकता प्रदर्शिता । किमर्थम् इति पृष्टे सति तेन उक्तम् - मौखिकपरीक्षार्थं यौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्यस्थानाभ्याम् आगमिष्यतः (एकः प्राध्यापकः, अपरः संस्कृतविश्वविद्यालयस्य कुलपतिः) तयोः विमानचिटिकाव्ययनिर्वहणं, वासव्यवस्था, मिष्टान्नादीनां निमित्तं धनव्यवस्था च परीक्षार्थिना एव करणीया'' इति। (विश्वविद्यालयेन अपि मार्गव्ययः दीयते !) एषः कश्चन अपवादः नैव, सामान्या परिपाटी !

कश्चन कृतसंस्कृताध्ययनः युवा लब्धः। ''भवान् इदानीम् उपजीविकार्थं किं कुर्वन् अस्ति ?'' इति मया सः पृष्टः।

''निबन्धान् लिखामि'' इति तेन उक्तम्।

अहं न अवगतवान्, किमिति पुनः पृष्टवान् च। तदा तेन पुनः विवृतं यत् तेन शोधच्छात्रेभ्यः (Ph.D कृते) शोधनिबन्धाः विलिख्य दीयन्ते, निबन्धस्य गात्रानुगुणं विषयानुगुणं च रू.५०००/- रू. १०,०००/- वा (बहुविधानि मूल्यानि सन्ति तत्र) लभ्यन्ते इति।

धनं, नैतिकता चेति द्वयोर्मध्ये बहुधा जयः भवति धनस्यैव। धननिमित्तं जनाः यत्किमपि कर्तुं सङ्कोचं न अनुभवन्ति। औपचारिकशिक्षणे, अनौपचारिककेन्द्रेषु वा, यत्र सर्वकारीयानुदानं भवति तत्र स्वेन धनं प्राप्तव्यम् इत्येतदर्थं वा, केनचित् अव्यवहाराः क्रियन्ते चेत्, अविद्यमाना सङ्ख्या प्रदर्श्यते चेत् स्तरादिविषयाः कागदमात्रे एव तिष्ठेयुः।

माध्यमिकविद्यालयेषु अपि ये छात्राः संस्कृतं स्वीकुर्वन्ति ते अङ्कप्राप्त्यर्थं संस्कृतं स्वीकुर्वन्ति इति वयं संस्कृतज्ञाः एव प्रचारं कुर्वन्तः स्मः एव। किञ्च, विंशतेः अङ्कानां पञ्चाशतः अङ्कानां वा संस्कृतं पठ्यते चेत्, 'कुञ्चिका'पुस्तकस्य आधारेण परीक्षार्थं लिख्यते चेत्, अन्यविषयशिक्षकैः संस्कृतं पाठ्यते चेच्च, तया रीत्या पठितवतां छात्राणां किं वा संस्कृतज्ञानं भवेत् ? परं विद्यालये संस्कृतपदरक्षणाय छात्रसङ्ख्या तु आवश्यकी एव ! पञ्चाशदधिकवर्षेभ्यः एषा स्थितिः अनुवर्तते स्म इति कारणात् तया रीत्या पठितवन्तः एव अद्य बहवः शिक्षकाः सन्ति देशे सर्वत्र ! शिक्षकाणामेव स्तरः एवम् अस्ति चेत् किं पुनः छात्राणाम् !! इतरभाषामाध्यमेन बि.ए.,एम्.ए.पठितवताम् अपि संस्कृतज्ञानस्तरः कः इति विषयः सर्वैः विदितः एव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतादृश्यां परिस्थितौ इदानीं कालः समागतः अस्ति संस्कृतज्ञानाम् अस्माकम् आत्मनिरीक्षणाय, संस्कृतस्य मूलरोगस्य कारणानाम् अन्वेषणाय । इदानीं समयः आगतः स्तरविषये गम्भीरतया चिन्तनाय, परिष्कारात्मकक्रमस्वीकाराय च ।

छात्राणां संस्कृतज्ञानस्तरः वर्धनीयः चेत् शिक्षकाणां स्तरः वर्धनीयः, पाठ्यपद्धतेः, पाठ्यपुस्तकानां च स्तरः वर्धनीयः । मूल्याङ्कनपद्धतेः परीक्षा-पद्धतेः च स्तरः वर्धनीयः । प्रशासनस्य स्तरः वर्धनीयः । संस्कृतज्ञानाम् अस्माकं सर्वेषां चिन्तनस्तरः अपि वर्धनीयः ।

यदा गुणवत्तायाः विषये अवधानं भवेत्, स्तरस्य विषये आग्रहः भवेत्, तदा सङ्ख्यायाः कश्चन ह्रासः भवेदपि । तदा अस्माभिः न भेतव्यम्, अपि तु धीरैः भवितव्यम् । 'गुणस्तरेण' विना संस्कृतज्ञत्वनाममात्रेण कथं वा संस्कृतोन्नतिः स्यात् ? अवनतिः एव भवेत् खलु ? अतः तात्कालिकरूपेण सङ्ख्याह्रासः भविष्यति चेत् भवतु नाम, गुणवत्तां, स्तरं च न परित्यजेम ।

स्तरविपयः यदा चिन्त्यते तदा संस्कृतभारत्याः कार्यकर्तृभिः अस्माभिः अपि कश्चन विषयः गम्भीरतया चिन्तनीयः । समाजे संस्कृतानुकूल-वायुमण्डलनिर्माणार्थम् अस्माभिः अद्यावधि सम्भाषणशिबिराणि एव अधिकतया चालितानि । भाषाभ्यासे, शास्त्राभ्यासे च प्रविष्टशिबिराणाम् अग्रे नयनाय अपेक्षितपरिमाणेन प्रयत्नं कर्तुं वयं न शक्तवन्तः । अतः बहूनाम् अस्माकं कार्यकर्तॄणां भाषास्तरः तथैव तत्रैव अस्ति यथा यत्र च आरम्भे आसीत् । सरलसंस्कृते वयं निपुणाः, परं प्रौढसंस्कृते अपि नैपुण्यं सम्पादयेम । भाषाशुद्धतार्थम् अस्माकम् आग्रहः इतोऽपि अधिकतरः भवेत् । कोऽपि अस्माकं भाषणे दोषान् दर्शयति चेत्, अस्माकं विषये विमर्शं करोति चेत् च अस्माभिः क्रुद्धैः, उद्विग्नैः वा न भवितव्यम् । अस्माभिः मौनेन भाषासम्बद्धा अध्ययनरूपा तपश्चर्या करणीया । व्याकरणाध्ययनं काव्याध्ययनं च करणीयम् । संस्कृतेन महता परिमाणेन लेखनकार्यं कर्तव्यम् । धाराप्रवाहिता, शुद्धता, शब्दसम्पत्तिः, शैली च इति भाषासौष्ठवस्य चतुरः अपि अंशान् स्वस्मिन् वर्धयितुं प्रयत्नं कुर्याम वयम् ।

सर्वेषां संस्कृतच्छात्राणां, शिक्षकप्राध्यापकानां, कार्यकर्तॄणां च -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. संस्कृतभाषास्तरवर्धनम्

२. भाषाप्रयोगसामर्थ्यवर्धनम्

३. शास्त्रज्ञानस्तरवर्धनं चेति एतदेव प्रकृतं संस्कृतप्रचारस्य महत्तमा आवश्यकता । सर्वैः संस्कृतभारत्याः कार्यकर्तृभिः आदौ स्वयम् उपरितनं त्रिविधं स्तरवर्धनं सम्पादनीयम् । सम्भाषणसामर्थ्यसम्पादनं सम्भाषण-शीलत्वं च प्रथमं सोपानम् । आरूढप्रथमसोपानैः अस्माभिः क्रमशः द्वितीयादिसोपानानि अपि आरोढव्यानि, न तु तत्रैव स्थातव्यम् ।

'सङ्घायां धर्मः उत स्तरे ?' इति प्रश्ने कृते 'स्तरपूर्विकायां सङ्ख्यायां धर्मः' इति उत्तरम् । अतः इदानीं स्तरवर्धनाय प्रयत्नः विधातव्यः । सरलसंस्कृतं, धाराप्रवाहिता च सरलतया प्राप्तुं शक्यते । भाषाशुद्धता भाषासौष्ठवं च आसादनीयं चेत् तदर्थं परिश्रमः करणीयः भवति । आलस्यं हित्वा कष्टानि सोढ्वा उद्यमं कृत्वा च वयं स्वोन्नतिं, संस्कृतोन्नतिं च युगपत् साधयेम ।

□□

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२.

संस्कृतज्ञेषु निवेदनम्

सर्वे जनाः भगवद्गीतां पठितुम् इच्छन्ति । ते इतरासु भाषासु विद्यमानानां गीतायाः अनुवादानां पठनेन न तृप्ताः, मूलं (संस्कृतश्लोकान्) पठित्वा अवगन्तुम् इच्छन्ति । अतः अस्ति तेषां सर्वेषां महती संस्कृतपठनेच्छा । शिक्षितसमाजस्य महतः भागस्य तां गीतापिपासां संस्कृतपिपठिषां च पूरयितुं संस्कृत-भारत्याः योजना - नगरे नगरे, स्थाने स्थाने च गीता-शिक्षणकेन्द्राणां प्रारम्भः इति ।

अद्यतनी वाणिज्यपरिभाषा वदति यत् कस्याश्चित् वाणिज्य-संस्थायाः समीपे उपयोगयोग्यः धनराशिः अनुपयुज्यमानः तिष्ठति चेत् सः कथ्यते - 'लिक्विड् केश्' (Liquid cash) इति । सः च 'लिक्विड् केश्'रूपः धनराशिः महान् सन् बहुकालं यावत् अनुपयुक्तः चेत् तस्याः संस्थायाः प्रबन्धनं सम्यक् नास्ति इति कथ्यते । तया एव पद्धत्या संस्कृतस्य स्थितिविषये विश्लेषणं क्रियते चेत् ज्ञायते यत् संस्कृतभाषायाः विषये, गीतायाः विषये च जनमानसे यत् अपारं प्रेम अस्ति तद् अस्माकं 'लिक्विड् केश्' इति । तस्य योग्यः लाभकरः विनिवेशः (Profitable Investment) कर्तव्यः । परम् अद्यावधि अस्माभिः सः सद्विनियोगः न कृतः इति कारणात् संस्कृतप्रचारक्षेत्रे अपेक्षितं फलं प्राप्यमाणं नास्ति । अतः तस्य जनानुरागस्य सदुपयोगाय अस्माभिः गीताशिक्षणकेन्द्राणि चालनीयानि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जनाः किमर्थं संस्कृतं पठितुम् इच्छन्ति ? उपजीविकायै तु नैव । बहवः तु गीता-वेदान्त-वेदादीनां पठनाय । तथा चेत् उद्देशभूतायाः गीतायाः माध्यमेन संस्कृतं पाठनीयम् । तदा एव संस्कृताध्ययनं जनचित्ताकर्षकं भवेत् । किञ्च, जनाः गीताध्ययनं संस्कृतमाध्यमेन कर्तुम् इच्छन्ति, न तु अनुवादमाध्यमेन । यदि अनुवादमाध्यमेन ऐषिष्यन् तर्हि तस्य परिणामेन एतावता तादृशं किञ्चित् शिक्षणान्दोलनं जातम् अभविष्यत् । एतद् अंशद्वयं मनसि निधाय गीतामाध्यमेन संस्कृतशिक्षणस्य, संस्कृतमाध्यमेन गीताशिक्षणस्य च केन्द्रस्य कल्पना कृता संस्कृतभारत्या । २००९-२०१० तमे शैक्षिकवर्षे संस्कृतभारत्याः सर्वेषु अपि कार्यक्रमेषु मुख्यभूतः कार्यक्रमः भविष्यति 'गीताशिक्षणकेन्द्रम्' । गते अक्टोबर्मासे[1] सम्भाषणसन्देशे भगवद्गीताशिक्षण-केन्द्रम् इति किञ्चित् लेखनं लिखितम् आसीत् । कृपया तदपि पठ्यताम् । पुनश्च तद्विषये अत्र लिख्यमानम् अस्ति इत्यनेन एव एतस्याः योजनायाः महत्त्वं प्रामुख्यं च वाचकः अवगन्तुं शक्नुयात् ।

बेङ्गलूरुतः देहलीगमनाय 'कर्णाटक-एक्सप्रेस्'नामकं रेल्यानम् आरोढव्यम्, न तु गुवहाटी-एक्सप्रेस् । यः चायमेव पातुम् इच्छति तं तक्रं यदि वयं पाययेम तर्हि तस्य मनसः समाधानं न भवेत् । संस्कृतप्रचारस्य अस्माकं कार्यस्य सम्बन्धे एतद् उदाहरणद्वयं युज्यते । अतः गीताशिक्षणकेन्द्रं चिन्तितम् ।

जनाः क्रेतुम् इच्छन्ति पाकसम्बन्धीनि वस्तूनि इति चिन्त्यताम् । परं कश्चन उद्घाटयति वस्त्रापणम् । तदा तस्य आपणे कथं वा वाणिज्यं सुष्ठु प्रचलेत् ? न प्रचलेत् ननु ? संस्कृतप्रचारकार्यविषयेऽपि अद्यावधि एतदेव जातम् ।

गीताशिक्षणकेन्द्रं संस्कृतजगतः कामधेनुः भवितुम् अर्हति । जनानां संस्कृतशिक्षणं, प्रचारकार्याय कार्यकर्तॄणां प्राप्तिः, संस्कृतस्य उपयोगितायाः आवश्यकतायाः च सत्यापनं, प्रजातन्त्रे अपेक्षितस्य जनसमर्थनस्य प्राप्तिः, सर्वकाराणां राजनीतिज्ञानां च सम्प्रेरणाय आवश्यकस्य जनाभिप्रायस्य रूपणं, प्रतिनगरं प्रतिस्थानं च संस्कृतस्य पालकानां पोषकाणां च प्राप्तिः इत्यादिभिः

---

१. एषः लेखः २००९ तमस्य वर्षस्य एप्रिल्मासे लिखितः आसीत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकारैः बहुफलदं भविष्यति गीताशिक्षणकेन्द्रम् ।

विद्यालयभवनेषु, मन्दिरेषु, सामुदायिकभवनेषु, सामाजिक-सांस्कृतिक-सङ्घानां भवनेषु, कार्यालयेषु च गीताशिक्षणकेन्द्राणां कक्ष्याः भवितुम् अर्हन्ति । गृहेषु अपि भवितुम् अर्हन्ति । विशेषतः महिलानां मध्ये एतद् कार्यं व्यापकम् अभियानरूपं प्राप्तुम् अर्हति । या काऽपि संस्कृतज्ञा स्वगृहे अपि महिलाभ्यः एव कक्ष्याः चालयितुं शक्नुयात् ।

गीतासोपानम् - १, गीतासोपानम् - २, गीताप्रवेशः - १, गीताप्रवेशः - २ इति चत्वारः पाठ्यक्रमाः । प्रतिपाठ्यक्रमं चतुर्णां मासानां पाठः । पाठ्यक्रमयोः मध्ये पञ्चदशानां दिनानां विरामः । एवम् आहत्य अष्टादशानां मासानां शिक्षणयोजना । आरम्भाद् एव सोपानद्वये सम्भाषणमाध्यमेन, संस्कृतमाध्यमेन, गीतायाः उदाहरणानां माध्यमेन च संस्कृतभाषायाः पाठनम् । तेन सह गीताश्लोकानां पठनाभ्यासः, पदच्छेदाभ्यासः, अन्वयाभ्यासः च । तृतीये पाठ्यक्रमे गीतास्थैः उदाहरणैः एव सन्धिसमासादीनां व्याकरणनियमानां पाठः, चतुर्थे पाठ्यक्रमे तु आकाङ्क्षापद्धत्या गीताश्लोकानां पाठः । अयं कश्चन अपूर्वः, सुन्दरः, ऐदम्प्राथम्येन निर्मितः च पाठ्यक्रमः 'गीताशिक्षणकेन्द्रं' नाम । चतुर्षु अपि पाठ्यक्रमेषु प्रतिसप्ताहं पर्यायदिनेषु, सप्ताहान्ते वा द्वित्राः कक्ष्याः भवेयुः । प्रतिपाठ्यक्रमम् आरम्भात् पूर्वं राज्यस्तरे (क्षेत्रस्तरे वा) शिक्षकाणां प्रशिक्षणं भवेत् । प्रत्येकं केन्द्रस्य उद्घाटनसमारम्भः महता प्रचारेण भवेत् । शिक्षणकेन्द्रस्य अङ्गतया आवर्षम् अन्ये च बहवः कार्यक्रमाः भवेयुः ।

प्रयोगरूपेण येषु केषुचित् स्थानेषु गीताशिक्षणकेन्द्राणि आरब्धानि तत्र सर्वत्र अत्यन्तम् उत्साहवर्धकः महान् प्रतिस्पन्दः दृश्यते । जनाः सोत्कण्ठाः दृश्यन्ते । प्रारम्भिकाणि लक्षणानि परिशील्यन्ते चेत् भासते यत् एतद् किञ्चन महत् जनान्दोलनं भविष्यति इति ।

परन्तु मूलभूतः प्रश्नः सः एव - शिक्षकाः के इति । लोकाः तु पठितुं सज्जाः । अस्माभिः पाठयितुं सज्जैः भवितव्यम् । एषः कश्चन महान् अवसरः ।

अतः सर्वेषु संस्कृतज्ञेषु मम सादरं साग्रहं च निवेदनं यत् नित्यप्रवासकर्तॄन्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्णकालिकान् विहाय अन्यैः सर्वैः अपि संस्कृतज्ञैः, एकैकेन एकैकं गीता-शिक्षणकेन्द्रं चालनीयम्, अर्थात् तत्र पाठनीयम् इति । तदर्थं कृपया संस्कृतभारत्याः स्थानीयकार्यकर्तॄणां सम्पर्कं कृत्वा स्वीयां पाठनेच्छां स्वयमेव सूचयन्तु भवन्तः । संस्कृतज्ञानाम् अस्माकं संख्या देशे पञ्चलक्षमिता अस्ति । वयं मनः कुर्याम चेत् कामपि ऐतिहासिकीं क्रान्तिमेव उत्पादयेम !

जुलैमासस्य प्रथमदिनाङ्कतः सर्वत्र कक्ष्याणां प्रारम्भः भवेत् । अतः मेमासे जूनमासे वा राज्येषु शिक्षकाणां वर्गः भवेत् । एकैकेन शिक्षकेण सह द्वित्राः अन्ये सामाजिकाः कार्यकर्तारः योजनीयाः केन्द्रव्यवस्थार्थं शिक्षार्थि-सङ्ग्रहाय च । अप्रैल-मे-जूनमासेषु महान् प्रचारः करणीयः । तदर्थं देहलीतः, राज्यकार्यालयात् च बहुवर्णयुतानि प्रचारपत्रकाणि, भित्तिपत्राणि च प्रेषयिष्यन्ते । प्रचाराय अन्यद् यद् यद् करणीयं तद् सर्वं स्थानीयस्तरे करणीयमेव ।

विविधसंस्थानां सहयोगेन अपि एतानि गीताशिक्षणकेन्द्राणि भवितुम् अर्हन्ति । परन्तु अयं विषयः अपि सर्वेषां स्पष्टं भवेत् यत् केन्द्राणां सर्वे शिक्षार्थिनः अग्रे गत्वा संस्कृतभारत्याः कार्यकर्तारः भवेयुः इति ।

प्रत्येकं पाठ्यक्रमस्य अनन्तरम् (अर्थात् अग्रिमस्य आरम्भात् पूर्वं) शिक्षकाणां नैपुण्यवर्गः राज्यस्तरे क्षेत्रस्तरे वा भवेत् । प्रत्येकं पाठ्यक्रमस्य अन्ते राज्यस्तरे सर्वेषां शिक्षार्थिनाम् आवासीयशिबिरं भवितुम् अर्हति । पुनश्च कृष्णाष्टमी, गीताजयन्ती इत्यादीनाम् उत्सवानाम् आचरणं, सामूहिकः गीतापारायणकार्यक्रमः, गीताविषयकव्याख्यानानि इत्यादयः बहुविधाः कार्यक्रमाः भवितुम् अर्हन्ति ।

गीताशिक्षणकेन्द्रे चतुर्षु पाठ्यक्रमेषु अधोनिर्दिष्टानि चत्वारि पाठ्यपुस्तकानि अनिवार्यतया भविष्यन्ति । पाठ्यक्रमस्य नाम एव पुस्तकस्यापि नाम ।

१. गीतासोपानाम् – १

२. गीतासोपानम् – २

३. गीताप्रवेशः – १

४. गीताप्रवेशः – २ (प्रथमखण्डः, द्वितीयखण्डः च)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतदतिरिक्ततया – १. गीता (मूलमात्रम्) २. गीताधातुरूपावली

३. गीतापदकोषः ४. गीतापठनस्य सान्द्रमुद्रिका (CD) ५. अन्यानि पुस्तकानि च ऐच्छिकानि भवेयुः । पाठ्यपुस्तकानि तु प्रकाशितानि, इतराणि सज्जीक्रियमाणानि सन्ति । प्रकाशितानां पुस्तकानां बाह्यरूपम् आन्तरिकं विषयवस्त्वादिकं च ये ये पश्येयुः ते द्रष्टारः सर्वे अपि अनुपदम् एव यथा क्रीणीयुः, शिक्षणकेन्द्राय स्वस्य नामाङ्कनं कारयेयुः च तथा सुन्दरतया पाठाः लिखिताः सन्ति । तेषां पाठनम् अपि सर्वस्य अपि संस्कृतज्ञस्य महते आनन्दाय भवेत् । कश्चन विनूतनः अनुभवः भवेच्च ।

गीतायाः अध्यायाः १८, महाभारतस्य पर्वाणि १८, युद्धं प्रवृत्तं १८ दिनानि, सेना १८ अक्षौहिणीमिता च । गीताशिक्षणकेन्द्रस्य चिन्तनम् आ १८ वर्षेभ्यः प्रचलति । चतुर्णां पाठ्यक्रमाणां पुस्तकानां लेखनकार्याय १८ मासाः आवश्यकाः अभवन् । चतुर्णां पाठ्यक्रमाणां कालावधिः आहत्य १८ मासाः । अभियानरूपेण एतेषां प्रारम्भस्य सङ्कल्पः गतमासे कुरुक्षेत्रे सञ्जातायां संस्कृतभारत्याः अ.भा.समीक्षायोजनागोष्ठ्यां जातः । एतत्सर्वं कश्चन दैवीयोगः इत्येव भासते । महत् किमपि प्रतीक्ष्यते !

१८ मासान् आन्तं यावत् ये पठेयुः ते भगवद्गीतायाम् उत्तमम् अधिकारं प्राप्नुयुः एव । तदनन्तरं तेषां शिक्षकप्रशिक्षणं करणीयं, येन ते पुनः गीताशिक्षणकेन्द्रस्य शिक्षकाः भवेयुः । यदि गीतासोपानस्य प्रथमभागे ३६ शिक्षार्थिनां सङ्ग्रहः करिष्यते तर्हि मध्ये परित्यक्तॄन् विहाय न्यूनातिन्यूनं १८ जनाः आन्तं पठेयुः । ते पुनः शिक्षकाः भवेयुः । एवम् अस्मासु एकैकेन कार्यकर्तृशिक्षकेण मया भाविषु १८ मासेषु १८ गीताशिक्षणकेन्द्रशिक्षकाः निर्मातव्याः इति लक्ष्यं स्वीकृत्य कार्यं करणीयम् ।

संस्कृतशिक्षणस्य, संस्कृतप्रचारस्य, संस्कृतसेवायाः च एतस्मिन् पवित्रे कार्ये गीताशिक्षणकेन्द्रम् इति एषः कश्चन महान् अवसरः । संस्कृतं, गीता च इति उभयोः युगपत् प्राप्तिः इति जनानां लाभः । संस्कृतऋणप्रत्यर्पणाय, कर्तव्यपूर्त्यै च संस्कृतज्ञानाम् अस्माकं महत्तमः अवसरः, अनन्यलभ्यः सेवावसरः च । संस्कृतज्ञस्य मम संस्कृतानुरागः प्रत्यक्षतः क्रियारूपेण प्रकटितः भवेत् खलु ! तदर्थम् एतद् गीताशिक्षणकेन्द्रं सर्वोत्कृष्टम् उपकरणम् । एवं सामान्यजनानां दृष्ट्या, संस्कृतज्ञानां दृष्ट्या, संस्कृतभाषायाः दृष्ट्या च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

गीताशिक्षणकेन्द्रं किञ्चन अत्यन्तं महत्त्वभूतं कार्यम् । अतः अस्मासु सर्वेण अपि गीताशिक्षणकेन्द्रशिक्षकरूपेण समर्पणभावेन कार्यं कृत्वा संस्कृतसेवा करणीया एव । मम धनलाभः कियान् इति केनापि नैव चिन्तनीयम् । संस्कृतस्य कियान् लाभः इत्येव चिन्तनीयम् । तच्चिन्तनमेव अस्माकं संस्कृतप्रेम्णः निकषः ।

एतावत्पर्यन्तं वयं संस्कृतात् प्राप्तवन्तः । इदानीं वयं संस्कृताय दद्याम ! समयदानं कुर्याम !!

□□

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३.

फलप्राप्तिपर्यन्तम्....

वयं किञ्चन लक्ष्यं स्वीकृत्य कार्यप्रवृत्ताः भवामः, विविधान् यत्नान् कुर्मः च । कदाचित् कार्यं सिद्ध्यति, कदाचित् नैव । कार्ये असिद्धे, पुनः प्रयत्नं कुर्मः, प्रयत्नान्तरं कुर्मः, पुनः पुनः प्रयतामहे च । परं तदा प्रश्नः उदेति यत् कतिवारं, कदापर्यन्तं प्रयत्नः इति । यद्यपि केषुचित् गौणकर्मसु केषाञ्चन प्रयत्नानाम् अनन्तरं स्वसमीपे विद्यमानं समयं, श्रमसामर्थ्यम्, आद्यताम्, आनुकूल्यम्, औचित्यानि च दृष्ट्वा अस्माभिः तद्विषये पुनरीक्षणं क्रियेत तथापि प्रधानलक्ष्ये, मुख्यकर्मणि, अवश्यकरणीये कार्ये, च (कार्यपद्धतिः, गुणवत्ता इत्यादिषु च) कदापर्यन्तम् इत्यस्य एकमात्रम् उत्तरं चिन्तनीयं - 'फलप्राप्तिपर्यन्तम्' इति ।

तथा प्रयत्नम् अपरित्यज्य, निराशेन अभूत्वा समोत्साहेन लक्ष्यप्राप्तिपर्यन्तं क्रियावता भवितव्यं चेत् ये उपायाः आश्रयणीयाः स्युः ते केचन अत्र दत्ताः सन्ति । परिशील्यन्ताम् ।

१. 'यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः' इत्यस्याः सुभाषितपङ्क्तेः 'यत्नः कृतः, न सिद्धम्, अत्र दोषः नास्ति, किमपि कर्तुं न शक्यते, चिन्ता न करणीया' इत्यादिरूपेण अन्यथा व्याख्यानं न करणीयम् । फलस्य अप्राप्तितः जातस्य दुःखस्य निवारणाय अनया रीत्या समाधानं कदाचित् लभ्येत । परं तद् न योग्यम् । अत्र दोषः कः इत्युक्ते का न्यूनता इति पर्यालोच्य तां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्यूनताम् अवगत्य अग्रिमवारं तां न्यूनतां विना प्रयतनीयम् इत्यर्थः एव अस्माभिः ग्रहीतव्यः ।

२. प्रयत्नेषु क्रियमाणेषु यानि प्रारम्भिकवैफल्यानि स्युः तेषां वैफल्यानां परिणामतः जायमानाभ्यः मनुष्यसहजाभ्यः निराशता-चिन्ता-दुःख-मनोवेदनादिभ्यः भावनाभ्यः आत्मा रक्षणीयः । एतत् प्रथमम् अपघात-स्थानम् (Accident Zone) । मार्गे एतादृशानि अपघातस्थानानि असङ्ख्यानि भवन्ति । जागरूकः ध्येयपथिकः अपघातान् निवारयति । वस्तुतः वैफल्यं 'वैफल्यं' न, परं वैफल्यतः प्रभावितैः भूयते यत् तद् एव 'वैफल्यं' नाम । कार्ये पराजयः प्राप्येत चेदपि मनः पराजितं न भवेत् । शरीरस्य श्रमः भवेत् चेदपि मनसः श्रमः न भवेत् । मनः उत्साहस्य अनन्तः उत्सेकः स्यात् ।

३. प्रत्येकं विफलता कश्चित् पाठं पाठयति । तथा पठितः पाठः प्रविशन्तीं विफलतां द्वाराद् बहिः एव अवरुणद्धि । अतः पाठाः पठ्यन्ताम् । पठनस्य आनन्दः अनुभूयताम् ।

४. महत्तमं कार्यं साधयितुं महत्तमः प्रयत्नः, महत्तमा शक्तिः, महत्तमं मूल्यं वा अपेक्षितं भवति । उपायः यावान् महान् स्यात् तावान् एव महान् भवेत् तत्सम्बद्धः अपायः । अतः महत्तमकार्येषु कर्तव्येषु अपायसम्भावना (Risk) अपि महत्तमा एव भवेत् । तादृश्याः तस्याः सम्मुखीकरणाय सज्जता अपि महत्तमा भवेत् ।

५. मनसि गौरवत्रयं भवेत् -
   १. स्वस्य सामर्थ्यस्य विषये गौरवभावना ।
   २. इतरेषां संसूचनानां (उपदेशानाम् इति वा) विषये गौरवभावना ।
   ३. स्वस्य सर्वेषां कार्याणां, कार्यपरिणामानां च विषये उत्तरदायी अहमेव इति विषये गौरवभावना ।

गौरवभावना नाम गम्भीरतया विषयस्य स्वीकरणम् । किञ्च, स्वस्य मनोवाक्कायानां विषये ये गौरवहीनाः स्युः ते एव न्यूनान् दोषान् कुर्वन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

६. कार्यं नष्टं चेदपि मनः नष्टं न भवेत् इति प्रयतनीयं चेत् तदर्थं भाववशगत्वं न उपकाराय । कर्तव्यवशगः जनः एव अन्ते वशीकृतफलः भविष्यति ।

७. कदाचित् प्रारम्भिकाणि लघुवैफल्यानि भाविनः महतः भाग्यस्य द्वारोद्धाटनस्य कारणानि भवन्ति इति सत्यम् अस्माभिः सदैव स्मर्तव्यम् ।

८. जीवनं नाम काचित् क्रीडा । सर्वस्याः अपि क्रीडायाः केचन नियमाः भवन्ति । ते अवगम्यन्ताम् । सोत्साहं सानन्दं च क्रीड्यताम् ।

९. यदा भवता कश्चन दोषः कृतः इति ज्ञायेत तदा अनुक्षणम् एव तस्य परिष्काराय पदं निधीयताम् । निर्लज्जेन भूयतां च ।

१०. बाहू प्रसार्य आलिङ्गनेन परिवर्तनशीलतायाः स्वागतं क्रियताम् ।

११. अस्माकम् अवधानं फले न भवेत्, अपि तु कया रीत्या कार्यं करणीयम् इति पद्धतौ भवेत् ।

१२. कार्यसिद्धौ बहूनि कारणानि भवन्ति –
१. लक्ष्यस्य योग्यत्वम् २. पूर्वसज्जता ३. समयस्य आनुकूल्यम् ४. उचिते काले उचितं कार्यम् ५. साधनानि ६. कार्यविभजनम् (वितरणं च) ७. संयोजनम् ८. सातत्यम् इत्यादीनि । तानि कार्यसिद्धिकराणि चिन्त्यन्ताम् ।

१३. यावता परिमाणेन विस्तरेण पूर्वचिन्तनं भवेत् तावता एव परिमाणेन दोषसम्भावनायां न्यूनता स्यात् ।

१४. लघुषु अंशेषु अवधानेन महत्तमं कार्यं स्वयं सिद्ध्येत् ।

१५. कार्ये गुणवत्ता रक्ष्यताम् । गुणवत्ता फलं रक्षिष्यति ।

१६. केषाञ्चित् शकटानां चालनाय कुञ्चिकायाः भ्रामणं पर्याप्तं भवति । केषाञ्चित् तु पादेन प्रहारः आवश्यकः भवति । भवतः जीवनशकटः अन्यस्य पादेन प्रहृतः न भवेत्, अपि तु स्वयंचालितः स्यात् ।

१७. जनाः, परिस्थितिः, साधनानि वा कथं सन्ति, कथं न सन्ति इति वा कारणेन भवतः कार्यकरणम् अकरणं वा न । भवता कथं भवितव्यम् इति तदनुगुणं भवतः कार्यं भवेत् । बाह्यकारणैः भवता प्रभावितेन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न भवितव्यम् । बाह्यनियन्त्रितः जनः प्रतिपदं विफलः भवेत् । अन्तःसत्त्वनियन्त्रितः तु पदे पदे जेष्यति ।

१८. चञ्चलमनस्कः, शीघ्रदुःखः, पलायनशीलः, सूक्ष्मसंवेदनः, अपरिश्रमशीलः, अतिरेकचिन्तकः इत्यादयः स्वल्पेन अपि कारणेन आहताः सन्तः कार्यात् विरमन्ति । अतः भवता एतद्विपरीततया भूत्वा फलप्राप्तिपर्यन्तं कार्ये स्थिरेण भाव्यम् ।

१९. स्वीकृतस्य कार्यस्य अर्धे अत्यागः, समाप्तिपर्यन्तं करणम् इत्येतत् कश्चन स्वभावः । प्रयत्नेन प्राप्तव्यः कश्चन गुणः ।

२०. समस्या समस्यायै न । भवान् समस्यां कथं पश्येत् इत्येतत् अवलम्ब्य समस्यायाः स्वरूपं निश्चितं भवेत् । अतः स्वीया दृष्टिः परिवर्त्यताम् ।

२१. अतीतं विस्मर्यताम् । वर्तमाने अवधीयताम् । भविष्यते आत्मा सज्जीक्रियताम् ।

२२. धनुषः निर्गतः बाणः लक्ष्यभेदनपर्यन्तं मध्येमार्गं न विरमति । (विरतः चेत् तस्य अधःपतनं सुनिश्चितम्) तथैव कृतकार्यसङ्कल्पः आरब्धकार्यश्च अहं फलप्राप्तिपर्यन्तं (अथवा यावज्जीवं) लक्ष्यदिशि धावन् एव स्याम् इति चिन्त्यताम् ।

२३. कष्टात् पूर्वं भीरुत्वं दृश्यते । कष्टे धीरत्वं दृश्यते । भीरुः धीरः भवितुम् अर्हति । किन्तु धीरः कदापि भीरुः नैव भविष्यति । यतः सः धीरः । फलप्राप्तिः धीरस्यैव भवति, न कदापि भीरोः ।

२४. स्वीयानि पदचिह्नानि पृष्ठतः परित्यज्यन्तां, न तु पुरतः विद्यमानानां पदचिह्नानाम् अनुगमनं क्रियताम् । अतः कार्ये नद्यरण्यकण्टकपर्वतादीनां चक्रवातमहावातझञ्झावातादीनां चैव अपेक्षा क्रियताम् ।

२५. यदा कदापि उद्दिष्टं कार्यं न सिद्धं चेत् तदा एषः लेखः सकृत् पठ्यताम् । कञ्चित् कालं यावत् शान्ततया चिन्त्यताम् । कश्चन प्रकाशः अवश्यमेव लभ्येत । कश्चन मार्गः, कश्चन उपायः स्फुरेत् च ❑❑

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४.

वरदानम् उत अभिशापः ?

संस्कृतविदुषां परम्पराद्वयम् । 'अकारणं षडङ्गो वेदः अध्येतव्यः' इति चिन्तयन्तः लाभोद्देशेन विना षड्भिः वेदाङ्गैः सह वेदस्य वेदानां वा अध्ययनकर्तारः द्विवेदिनः त्रिवेदिनः चतुर्वेदिनः च, 'कुम्भीधान्याः अलोलुपाः कारणमन्तरा शास्त्रपारगाः' इति पतञ्जल्युक्त्यनुसारम् अधनसङ्ग्रहशीलाः, यदृच्छालाभसन्तुष्टाः (भगवता दत्तेन सन्तुष्टाः इत्यर्थः) लाभोद्देशेन विना अध्ययनं कृत्वा बहुषु शास्त्रेषु पारङ्गताः च विद्वांसः धनार्जनचिन्तां विना, पदसम्पादनाद्याकाङ्क्षाः विना च अध्ययनाध्यापनादिकर्मसु व्यापृताः आसन् । तादृशानां शिष्टानां परम्परा एका । अपरा आसीत् 'दिल्लीश्वरो वा जगदीश्वरो वा' इति राज्ञः स्तुतिं कृत्वा स्थानमानसुखसाधनादीनि प्राप्नुवतां परम्परा ।

प्रथमपरम्परीयाः संस्कृतज्ञाः अनामकाः एव तिष्ठन्तः ज्ञानयज्ञम् अकुर्वन्, संस्कृतोन्नतिम् असाधयन् । द्वितीय-परम्परीयाः संस्कृतज्ञाः अवसरवादिनः सन्तः स्वस्यैव उन्नतिम् असाधयन् । प्रथमविधाः महासङ्कोचशीलाः, द्वितीयविधाः च निर्लज्जाः !

१८७० तमे वर्षे महाराज्ञ्याः विक्टोरियायाः पुत्रः 'ड्यूक् आफ् एडिनबरो' यदा काशीम् आगतवान् तदा काश्याः प्रसिद्धाः सप्तदश विद्वांसः 'सुमनोऽञ्जलि'नाम्ना तस्य राजपुत्रस्य स्तुतिगीतानि रचितवन्तः । १८७७ तमे वर्षे विक्टोरिया-राज्ञ्याः सिंहासनारोहणस्य सुवर्णमहोत्सवं निमित्तीकृत्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काश्याः ६६ पण्डिताः 'मानसोपायन'नामकं ग्रन्थं विरचय्य 'भारतराज-राजेश्वरी' इति तां स्तुतवन्तः, आङ्ग्लेयानां तोषणाय प्रयत्तवन्तः च । परिणामतः तस्मिन् एव वर्षे आङ्ग्लसर्वकारेण संस्कृतविद्वद्भ्यः 'महा-महोपाध्याय'बिरुददानं, तद्बिरुदधारिभ्यः च यावज्जीवं प्रतिवर्षं १०० रूप्यकात्मकः पुरस्कारराशिः च घोषितः । अग्रिमेषु वर्षेषु ये विद्वांसः आङ्ग्लेयानां स्तुतिं कुर्वन्ति स्म, आङ्ग्लेयानाम् उत्तमसम्बन्धं संरक्षन्ति स्म, आङ्ग्लेयानां गूढान् उद्देशान् साधयन्ति स्म, इतिहासविकृतीकरणे उपकुर्वन्ति स्म च ते सर्वे विद्वांसः तम् उपाधिं धनराशिं च अवश्यमेव प्राप्नुवन्, सरलतया च अवाप्नुवन् । इतरैः तु महत् तपः करणीयं भवति स्म । भारतस्य स्वातन्त्र्यानन्तरं सा एव ब्रिटिश्कालीना व्यवस्था राष्ट्रपतिसम्मान-रूपेण परिवृत्ता । (परिवर्तिता वा !)

कस्यचित् जनविशेषस्य विषये विमर्शः, संस्कृतज्ञानाम् अस्माकम् एव दूषणं वा प्रकृतलेखनस्य उद्देशः न । परन्तु वयं कथं स्मः, कथं न भवेम, संस्कृतजगति किं प्रचलति, किञ्च न भवेत् इति अस्मासु चर्चा भवेत् इत्येतस्य निमित्तं कश्चन चर्चाविषयः अत्र प्रस्तूयते । एतं लेखं ये पठेयुः ते सर्वे यदि स्वजीवनस्य उदाहरणैः नवम् आदर्शम् उपस्थापयेयुः, निःस्वार्थपरम्परां शतमुखं यदि संवर्धयेयुः तर्हि लेखस्यास्य सार्थक्यं स्यात् ।

कैश्चित् कारणैः सम्मानाः पुरस्काराः च आवश्यकाः । संस्कृतज्ञस्य कस्यचन सम्मानः यदि भवेत् तर्हि समाजे तस्य परिचयः, प्रतिष्ठा च या भवेत् सा संस्कृतस्य प्रतिष्ठायै भवेत्, अन्येषामपि संस्कृतपठनस्य प्रेरणायै भवेत्, पुरस्कारप्रदानेन तस्य प्रोत्साहनं भवेत्, तस्य कार्यविषयस्य प्रचारः अपि भवेत् । अतः संस्कृतज्ञानां कृते एव विशिष्टाः पुरस्काराः, सम्मानाः च भवेयुः इति पक्षः योग्यः एव । परन्तु एतेन यदि जनाः पुरस्कारैकदृष्टयः, सम्मानैकचित्ताः च भवेयुः तर्हि सः कश्चन हानिकरः पक्षः भवेत् ।

संस्कृतक्षेत्रे यावन्तः पुरस्काराः सन्ति तावन्तः नान्यत्र कुत्रापि । प्रतिवर्षं १५ विद्वद्भ्यः राष्ट्रपतिपुरस्कारः घोष्यते दीयते च । (पुरस्कृतः यावज्जीवं प्रतिवर्षं ५०,००० रूप्यकाणि प्राप्नोति । तस्य दिवङ्गतेः अनन्तरं तस्य पत्नी अपि यावज्जीवं प्रतिवर्षं २५,००० रूप्यकाणि प्राप्नोति । को वा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अमुं पुरस्कारं न काङ्क्षेत् ?) एतत्समानतया पञ्चभ्यः वेदपण्डितेभ्यः अपि राष्ट्रपतिपुरस्कारः दीयते । प्रतिवर्षम् एकस्मै युवसंस्कृतज्ञाय १,००,०००.०० रूप्यकात्मकः श्रीबादारायणव्याससम्मानः अपि भवति । (एषः प्रधानमन्त्रिणः द्वारा दाप्यमानः भवति ।) दाल्मियाफौण्डेशन् इत्यस्य श्रीवाणीपुरस्कारः (रू. २,००,०००/-), एतत्समानः बिर्लाफौण्डेशन् इत्यस्य पुरस्कारः, केन्द्रीयसाहित्य-अकाडमी इत्यस्य श्रेष्ठसंस्कृतसाहित्यकृत्यै एकः पुरस्कारः, श्रेष्ठसंस्कृतानुवादाय च एकः पुरस्कारः, महाराष्ट्रशासनस्य कालिदाससंस्कृतसेवापुरस्कारः (रू ५०,०००/-), बहुभिः संस्कृत-विश्वविद्यालयैः प्रतिवर्षं दीयमानाः बहवः महोमहोपाध्याय-विद्या-वाचस्पत्यादिगौरवबिरुदाः, मध्यप्रदेशसंस्कृतबोर्ड इत्यस्य भवभूतिपुरस्कारः (रू. १,००,०००/-), भर्तृहरिपुरस्कारः (रू. २१,०००/-), पतञ्जलि-पुरस्कारः (रू. २१,०००/-), बाणभट्टपुरस्कारः (रू.२१,०००/-), वागर्थसम्मानः ५१ जनेभ्यः (रू.११००/-), कालिदाससंस्कृताकाडमि, उज्जयिनी इत्यस्य अखिलभारतीयः कालिदासपुरस्कारः (रू.२०,०००/), प्रादेशिकः भोजपुरस्कारः (रू. १०,०००/-), प्रादेशिकः राजशेखर-पुरस्कारः (रू. १०,०००/-), प्रादेशिकः व्यासपुरस्कारः (रू. १०,०००.००), उत्तरप्रदेशसंस्कृतसंस्थानस्य विश्वभारतीपुरस्कारः (रू. १,५१,०००/-), महर्षिवाल्मीकिपुरस्कारः (रू. १,००,०००/-), पञ्चभ्यः जनेभ्यः विशिष्टपुरस्कारः (प्रत्येकं जनाय रू. ५१,०००/-), एकादश वेदपण्डित-पुरस्काराः (रू.२५,०००/-), कालिदासपुरस्कारः (रू.२५,०००/-) बाणभट्टपुरस्कारः (रू.२५,०००/-), शङ्करपुरस्कारः (रू.२५,०००.००), सायणपुरस्कारः (रू.२५०००/-), व्यासपुरस्कारः (रू.२५,०००/-), षड्भ्यः जनेभ्यः विशेषपुरस्काराः (रू. ११,०००/-), विशंतिः विविधपुरस्काराः (रू. ५०००/-) च सन्ति । योग्यानां जनानाम् अभावतः केषुचित् वर्षेषु केचन पुरस्काराः नैव दीयन्ते (दानं नैव शक्यं भवति !) इति तु अन्या एव कथा ।

राजस्थानसंस्कृत-अकाडमी इत्यस्य २५,००० रूप्यकात्मकः एकः, २१,००० रूप्यकात्मकः, १५,००० रूप्यकात्मकौ द्वौ, ११ सहस्रात्मकाः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्त, ७,०००/- रूप्यकात्मकाः पञ्च च पुरस्काराः सन्ति । उत्तराञ्चलसंस्कृत-अकाडमि इत्यस्य हिमाद्रिसम्मानः (रू.१,५०,०००/-) बदरीशसम्मानः (रू. १,००,०००/-) भगीरथसम्मानः (रू. १,००,०००/-), पं. मदन-मोहनमालवीयसम्मानः (रू. ५०,०००/-), पुनश्च २५,०००/- रूप्यकात्मकाः अष्ट सम्मानाः, ११,०००/- रूप्यकात्मकाः ४ सम्मानाः च सन्ति । एतेन एव प्रकारेण अन्येषां बहूनां राज्यसर्वकाराणां वैयक्तिक-न्यासानां चापि बहवः सम्मानाः सन्ति ।

एतेषां सम्मानानां पुरस्काराणां च सम्बन्धे सूक्ष्मतया विश्लेषणेन बहवः अंशाः ज्ञाताः भवन्ति । केचन संस्कृतविद्वांसः एतादृशाः सन्ति यत् एतेषु सम्मानेषु उपपञ्चाशान् सम्मानान् एकैकः अपि प्राप्तवान् इति । तदेकलक्ष्यत्वेन कार्यं क्रियते चेत् फलप्राप्तिः भवति इति कथनं कियत् सत्यम् ! कश्चन तु स्वयम् अपि प्राप्तवान्, पत्नै अपि तावताम् एव पुरस्काराणां दापने समर्थः जातः च । यदा कश्चन अर्थशास्त्रज्ञत्वेन विख्यातः संस्कृतज्ञेभ्यः विद्यमानस्य राष्ट्रपतिपुरस्कारस्य प्राप्तौ सफलः भवति, यदा कश्चन विदेशमन्त्रालयस्य भूतपूर्वः सचिवः अपि प्राप्नोति, तदा तयोः कारणेन द्वौ संस्कृतपण्डितौ, यौ च आजीवनं संस्कृताय तपः आचरितवन्तौ तस्मात् पुरस्कारात् वञ्चितौ भवतः खलु ! श्रीमणिद्रविडशास्त्री, श्रीदेवदत्तपाटीलः, श्रीराजारामशुक्लः इत्यादयः महान्तः विद्वांसः यदा श्रीबादरायणव्याससम्मानभाजः अभवन् तदा तस्य सम्मानस्य एव गरिमा अधिकः अभवत् । परन्तु तमेव सम्मानं 'विप्रो'संस्थायाः कश्चन साफ्टवेर् इञ्जनियर् प्राप्नोति, वाराणस्याः काचित् अज्ञाता गृहीणी प्राप्नोति, तदा इतरेषां संस्कृतज्ञानां किम् अन्यत् भवेत्, रोषात् ऋते ? अत्र तु स्थालीपुलाकन्यायेन किञ्चिदेव दर्शितम् । राजधान्यां किं किं भवतीति कथा तु सुदीर्घा !

केषाञ्चित् पृष्ठतः सम्मानाः धावन्ति । केचन सम्मानानां पृष्ठतः धावन्ति ।

केचन वैदुष्येण तपसा च सम्मानं पुरस्कारं वा प्राप्नुवन्ति । केचन तु कौशलेन । किं कौशलम् ? स्वस्य 'Bio-data' इत्यस्य सुदीर्घीकरणस्य कौशलम् अथवा योग्यस्थाने योग्यजनानां सम्बन्धस्थापनकौशलम् । अन्यथा 'परस्परं भावयन्तः श्रेयः परमवाप्स्यथ' इत्यस्याः गीतापङ्क्तेः यथार्थानुसरण-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कौशलम् ! तत् कथम् इति अवगमनाय पञ्चभ्यः वर्षेभ्यः पूर्वं जाता काचित् घटना अत्र उदाहरणरूपेण उल्लिख्यते । प्राप्तपुरस्काराः जनाः संस्थाप्रमुखाः वा पद्मश्रीपद्मभूषणादिपुरस्कारेभ्यः कस्यचन नूतनस्य संस्तुतिं कर्तुम् अर्हन्ति । प्राप्तपद्मश्रीपुरस्कारः कश्चन संस्कृतज्ञः अन्यं कञ्चन संस्थाप्रमुखं (प्राप्त-राष्ट्रपतिपुरस्कारम् अर्थशास्त्रज्ञं) पद्मश्रीपुरस्काराय प्रस्तौति स्वीयेन संस्तुति-पत्रमाध्यमेन । सः एव संस्थाप्रमुखः तं प्राप्तपद्मश्रीपुरस्कारं महत्तराय पद्मभूषण-पुरस्काराय प्रस्तौति स्वीयसंस्तुतिपत्रेण !

कः कीदृशः इति एषः प्रकृतलेखनविषयः न । एतैः सम्मानैः, पुरस्कारैः च संस्कृतस्य लाभः भवेत् अथवा हानिः अपि अस्ति इति तु मुख्यः प्रश्नः, संस्कृतज्ञानाम् अस्माकं नैतिकबलस्य च प्रश्नः ।

एतादृशः एव अन्यः कश्चन गभीरः विषयः अस्ति – संस्कृतविश्व-विद्यालयानां कुलपतिपदानि इति । कर्णाटके स्थाप्यमानं विश्वविद्यालयम् अपि अविहाय देशे १५ संस्कृतविश्वविद्यालयाः भवन्ति । (इतरभाषाक्षेत्रे तु प्रतिभाषम् एकः एव विश्वविद्यालयः ! किञ्च अस्माकं सम्भाषणान्दोलनस्य प्रारम्भात् पूर्वं त्रयः एव आसन्, इदानीं १५ जाताः इत्यपि अवधानार्हः अंशः !) प्रायः कुलपतेः कार्यकालावधिः वर्षत्रयम् (क्वचित् ५ वर्षाणि अपि) । अर्थात् प्रतिवर्षं केषुचित् त्रिषु विश्वविद्यालयेषु (अथवा द्वयोः) कुलपतिपदपूर्तिः भवति एव । संस्कृतप्राध्यापकानां महान् अवसरः ।

सः विकासस्य अवसरः एव क्वचित् अन्यस्योपरि पङ्कक्षेपणस्य, कलहानां, मतभेदानां, निजपरविभागाणां च कारणमपि जायमानम् अस्ति । किञ्च, सम्मानपुरस्कारकुलपतिपदाकाङ्क्षिणः ये भवन्ति तेषु अधिकांशभूताः सहजतया तत्रैव दत्तावधानाः भवन्ति इष्टार्थसिद्धिपर्यन्तम् । एकवारं प्राप्तं चेत् पश्चात् पुनश्च कथं प्राप्येत इति, अथवा अन्यं 'मदीयं' तत्र कथम् आनयेयम् इति वा विषये व्यग्राः भवन्ति । एवं तर्हि संस्कृतस्य यः नेतृगणः भवति तस्य संस्कृतविकासस्य विषये चिन्तयितुं, सामूहिकयोजनां कर्तुं च कुत्र वा समयः भवेत् ? अस्माभिः पाठनम् अपि करणीयं नास्ति, यतः छात्राणां पठने रुचिः नास्ति इति छात्रान् दूषयित्वा [illegible] मुक्ताः स्मः ! न पाठनं, न वा प्रचारकार्यम् । अतः सम्मानपुरस्कारकुलपतिपदादिकं किं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वरदानम् उत अभिशापः ? स्वस्य 'Bio-data' उत्तमं, सुदीर्घं च करणीयं, स्वस्य विकासः साधनीयः, स्वस्य सुष्ठु प्रतिष्ठापनमपि भवेत् इति सर्वमपि सत्यमेव । परं संस्कृतस्य प्रतिष्ठापनम् अपि चिन्तनीयं खलु !

इतोऽपि गम्भीरतरः विषयः कश्चन अस्ति । संस्कृतस्य यद् यद् विनष्टम् अथवा नश्यमानं स्थानम् अस्ति तस्य सर्वस्य पुनः प्राप्त्यर्थम् अथवा विद्यमानस्य संरक्षणाय प्रजासत्तात्मकव्यवस्थायां सङ्घर्षः आन्दोलनं वा करणीयं भवति, राजनैतिकनेतॄन्, मन्त्रिणः, अधिकारिणः वा उद्दिश्य कठोरसत्यानि, अहितकर-विषयाः च वक्तव्याः भवन्ति कदाचित् । एतेषु कार्येषु कृतेषु कदाचित् सः संस्कृतज्ञः महत्त्वभूतस्थानेषु विद्यमानानां जनानां कोपभाक् अपि भवेत् । तेन तस्य सम्मान-पुरस्कार-कुलपतिपदादीनां हानिः भवेत् इति तस्य चिन्ता भवत्येव । अतः सः कर्तव्यम् अकृत्वा प्रमुखाणाम् उत्तमसम्बन्धं रक्षेयम् इति चिन्तयन् तदर्थं यद् यत् करणीयं तद् सर्वं कुर्वन् भवति । यदा संस्कृतक्षेत्रस्य प्रमुखाः संस्कृतहितं न रक्षेयुः, अथवा स्वार्थाय संस्कृतहितस्य, नैतिकतायाः च बलिदानं कुर्युः तदा अन्ये संस्कृतज्ञाः पश्यन्तोऽपि मौनम् आश्रयेयुः स्वस्य हानिः भवेत् इति चिन्तया ।

यावत् संस्कृतजगतः नायकवर्गः धैर्यवान् न भवेत्, संस्कृतहिताय स्वहितत्यागं न कुर्यात्, अन्यायविरुद्धं जनान्दोलनं न सङ्घटयेत्, धर्मप्रधानं, कर्तव्यकेन्द्रितं वा चिन्तनं न कुर्यात्, तावत् संस्कृतोन्नतिः दिवास्वप्नमात्रायेत । संस्कृतमाता प्रतीक्षते – संस्कृतज्ञेषु मूलभूतं किञ्चन चिन्तनपरिवर्तनं भवेदिति ।

इतिहासस्य दोषाणां पुनरावृत्तिः न भवेत् । किञ्च, त्यागस्य, परिश्रमस्य, समर्पणस्य च उदाहरणं भवेत् अस्मज्जीवनम् । श्वस्तनं दिनं संस्कृतदिनं भवेत्, श्वः प्रभाते भारतस्य पूर्वदिगन्ते संस्कृतसूर्योदयः भवेत् इति यदि इच्छा स्यात् तर्हि तदर्थम् अद्य आरात्रि जागरिताः सन्तः संस्कृतप्रचारयज्ञे स्वीयं समयं, धनं, सुखं च आज्यरूपेण अर्पयेम, आत्मानम् आहुतं कुर्याम च !

□□

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४.

भाषाशुद्धिः अपि चिन्तनीया

१९८१ तमे वर्षे संस्कृतसम्भाषणान्दोलनस्य प्रारम्भः जातः तदा वयं भाषणेषु, वैयक्तिके सम्भाषणे वा वदामः स्म - 'शुद्धं वा अशुद्धं वा, भवन्तः धैर्येण वदन्तु, अशुद्धं चेदपि चिन्ता नास्ति, वदन्तु ।', 'यः अधिकान् दोषान् करोति तस्य भाषाभ्यासः वेगेन भवति', 'भाषाप्रयोगे धाराप्रवाहिता आदौ भवेत्, शुद्धता तदनन्तरम्'.. इत्येवम् । 'दोषप्रदर्शनं कृपया मा क्रियताम्' इति प्रार्थयामः स्म । कदाचित् एतावती अतिरेकता आसीत् यत् जनानां मुखानि उद्घाटयितुम् इच्छद्भिः अस्माभिः 'अशुद्धमेव वदन्तु भवन्तः' इति निवेद्यते स्म । एतादृशस्य कथनस्य कारणं किम् आसीत् ?

तदा तादृशं वातावरणम् आसीत् यत् संस्कृतेन भाषणीयं चेत् शुद्धतया भाषणीयं, दोषाः किं, दोषः एव नैव कर्तव्यः, लघुः अपि भाषादोषः जातः चेत् तेन वक्त्रा महान् अपराधः कृतः इति भावना, तद्विषये इतरेषां कठोरा वाक्प्रतिक्रिया, तत्क्षणे तत्रैव दोषप्रदर्शनं, कदाचित् उपहासः च, क्वचित् सभायां, क्वचित् पृष्ठतः चेति । एतस्मात् कोऽपि संस्कृत-सम्भाषणे धैर्यमेव न करोति स्म । संस्कृतव्यवहारः सर्वथा लुप्तः एव आसीत् । दोषभयं ताण्डवायते स्म । तादृश्यां स्थितौ छात्रेषु शिक्षकेषु च धैर्यपूरणाय 'दोषाः क्रियन्ताम्' इति प्रेर्यते स्म । एवम् अतिरेकं निवारयितुम् अपरः अतिरेकः आसीत् । गतशतकस्य अष्टमे दशके जनेभ्यः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धैर्यदानमेव महत् कार्यम् आसीत् ।

गतशतकस्य नवमे दशके वयं प्रशिक्षणवर्गेषु वदामः स्म यत् चलनाभ्यास-समये पतनम् इव, भाषाभ्याससमये दोषाः सहजाः, अतः छात्रैः दोषाः क्रियेरन्, परं शिक्षकैः न इति । सम्भाषणशिबिरशिक्षकान् वयं वदामः स्म – 'शिक्षार्थिनां मनस्सङ्कोचनिवारणाय दोषपूर्णमपि भाषितुं शिक्षार्थिनः प्रेरयन्तु भवन्तः, परं शिक्षकेभ्यः भवद्भ्यः दोषकरणाय अनुज्ञा नैव दीयते' इति । शिक्षकाणां भाषापरिष्काराय, भाषाबोधनवर्गाः, व्याकरणशिक्षण-शिबिराणि इत्यादीनि कृतानि । प्रथमे दशके वयं व्यवहारवाक्यानां सम्भाषणानां च पुस्तकानि, ध्वनिमुद्रिकाः च अधिकं प्रकाशितवन्तः, द्वितीये दशके व्याकरणसम्बद्धानि, भाषाशुद्धिसम्बद्धानि च पुस्तकानि प्रकाशितवन्तः ।

अस्माकम् आन्दोलनस्य प्रारम्भकाले संस्कृतज्ञानां मध्ये तादृशं वातावरणम् आसीत् यत्र 'विद्वान् विपश्चिद् दोषज्ञः' इति अमरकोषोक्त्यनुसारम् आत्मानं 'विद्वान्' इति दर्शयितुं सभायां कश्चन संस्कृतेन भाषमाणः कमपि भाषाप्रमादं करोति चेत् श्रोतृषु बहवः दोषश्रवणमनु पार्श्ववर्तिनं पश्यन्ति स्म, पार्श्ववर्तिनं किमपि वदन्ति स्म, मुखमण्डलेन अनङ्गीकारं दर्शयन्ति स्म वा । दोषप्रदर्शनं वैदुष्यस्य लक्षणम् आसीत् । यः कश्चन अल्पज्ञोऽपि विदुषः अपि भाषायां दोषोद्घाटनसाहसं करोति स्म । (विदुषः पुरतः न, इतरेषां पुरतः !) शुद्ध-तया भाषणीयम् इति वक्तुम् इच्छन् वक्ता उपदिशति स्म – 'शुद्धः भाषणीयम्' इति !! एवं तर्हि भवन्त एव ऊहन्तां – परिस्थितिः कीदृशी आसीत् इति !!

परम् अद्य परिस्थितिः बहुधा परिवृत्ता अस्ति । संस्कृतज्ञेषु संस्कृतच्छात्रेषु च संस्कृतसम्भाषणे रुचिः दृश्यते । ते सम्भाषणाय उत्सहन्ते, दोषान् सहन्ते च । व्याकरणमहाभाष्ये उक्तं कूपखननन्यायम् उद्धरन्तः संस्कृतज्ञाः 'प्रयोग-शीलेन शिक्षार्थिना शुद्धता तावत् गच्छता कालेन सम्पादयिष्यते' इति उदाराः छात्रानुकम्पावन्तः च दृश्यन्ते । एतत् परिवर्तनं तु अस्माकं सौभाग्यम् ।

'वज्रादपि कठोराणि मृदूनि कुसुमादपि' इत्यस्य सुभाषितस्य उल्लेखं कुर्वन्तः तदा (आन्दोलनस्य प्रारम्भकाले) वयम् 'अस्माकं दोषविषये 'मनः वज्रादपि कठोरं स्यात्, इतरेषां दोषविषये कुसुमादपि मृदु भवेत्' इति वदामः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्म । इदानीं तथैव इतरेषां विषये कुसुमादपि मृदु दृश्यते एव । परं किं स्वस्य भाषादोषविषये मनः वज्रादपि कठोरम् अस्ति ? स्वस्य भाषाशुद्धतार्थं किम् आग्रहस्य अभावः, प्रयत्नस्य अभावः, परिश्रमस्य अभावः वा नास्ति ? अस्माभिः परदोषप्रदर्शनपटुभिः न भवितव्यम् । परं स्वदोषपरिष्कारतत्परैः तु भवितव्यम् एव ।

सम्भाषणान्दोलनेन निर्मितानां बहूनां कार्यकर्तॄणां (अत्र कृष्णशास्त्री अपि अन्तर्भवति), संस्कृतव्यवहारकर्तॄणां च संस्कृतभाषाशुद्धता दशभ्यः पञ्चदशभ्यः विंशत्याः वा वर्षेभ्यः पूर्वं यथा आसीत् तथा एव अस्ति अद्य अपि ! ईषदपि प्रगतिः न जाता । तत्र कारणं किम् इति अस्माभिः गम्भीर-तया चिन्तनीयं, परिष्कारोपक्रमाः च स्वीकरणीयाः ।

सरलसंस्कृताय आग्रहकरणसमये भाषाशुद्धतार्थं प्रयत्नः न्यूनः न भवेत् । सरलं, शुद्धं, निर्दुष्टं, पाणिनीयमेव संस्कृतम् अस्माभिः प्रयोक्तव्यम् । समस्या कुत्र आयाति इत्युक्ते कश्चन यदा संस्कृतेन भाषणसमर्थः भवति तत्पश्चात् सः संस्कृतेन भाषमाणः तु भवति, परं स्वस्य भाषादोषाः कुत्र कुत्र भवन्ति इति ज्ञातुं प्रयत्नमेव न करोति । यः तद्विषये बुद्धिमेव न व्यापारयति सः कथं वा अवगच्छेत् ? अहं संस्कृतेन 'सम्यगेव वदामि' इति चिन्तयन् भवति सः।

भाषामाध्यमेन व्याकरणपाठनं करणीयं, न तु व्याकरणमाध्यमेन भाषा-पाठनम् इति वयम् अवश्यं वदामः । परं कदापि एवं न वदामः यत् व्याकरणं न पठनीयम् इति । व्याकरणाभ्यासेन भाषाशुद्धता भवेत् अथवा भाषायाः शुद्धरूपस्य अर्थात् शुद्ध-परिनिष्ठितभाषायाः पठनेन लेखनेन च शुद्धता भवेत् । अस्माभिः उभयमपि न क्रियेत चेत्, क्रियमाणम् अपर्याप्तं चेत् वा भाषाशुद्धिः कथं भवेत् ?

धाराप्रवाहिता (Fluency), शुद्धता (Correctness), शब्दसम्पत्तिः (Vocabulary), शैली (Style) इति भाषाभ्यासस्य, भाषासौष्ठवसम्पादनस्य च चत्वारः अंशाः । अस्माभिः अद्यावधि प्रथमे एव अंशे अवधानं कृतम् । शिष्टेषु त्रिषु अपि अवधातव्यम् अस्ति । तदर्थं प्रत्येकं संस्कृतभारतीकार्यकर्ता परिश्रमं कुर्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सामान्यसम्भाषणं (सामान्याभिव्यक्तिः), सामान्यविषयप्रतिप्रादनं (विषयाभिव्यक्तिः), वैचारिकाभिव्यक्तिः, भावनाभिव्यक्तिः इति भाषामाध्यमेन अभिव्यक्तेः स्तरचतुष्टयम् । वयं बहवः इतोऽपि प्रथमे एव स्तरे स्मः । वैचारिकसिद्धान्तानाम् अभिव्यक्तीकरणाय, भावनानां कल्पनानां च अभिव्यक्तीकरणाय यत् भाषासामर्थ्यम् अपेक्षितं तत्तु सुदूरे एव । द्वितीयं यत् सामान्यविषयप्रतिपादनम् इत्यस्ति तदर्थम् अपेक्षितं भाषासामर्थ्यम् अपि अस्मासु नास्ति । तच्च सामर्थ्यं शुद्धताशब्दसम्पत्तिशैलीनां द्वारा सम्पाद्यते ।

धाराप्रवाहिता निरन्तरसम्भाषणमात्रेण सम्पाद्येत । परं शुद्धताशब्दसम्पत्तिशैल्यः बुद्धेः उपयोगेन (भाषाविषयकचिन्तनेन), व्याकरणनियमानाम् अभ्यासेन, कथानाटकोपन्यासनिबन्धादीनां मुहुः पठनेन, विचिन्त्य लेखनेन, लिखितस्य परिष्कारकारणेन च सम्पाद्यन्ते । अतः इतःपरं तानि सर्वाणि कार्याणि अस्माभिः अवश्यं करणीयानि । अन्यथा वयं 'संस्कृतसेवा अस्मद्ध्येयं, संस्कृतवृद्ध्यै वयं भवेम' इति यथा प्रतिजानीमहे (प्रतिज्ञां कुर्मः) तथा संस्कृतवृद्धिः अपि न भवेत्, अस्मद्वृद्धिः अपि न भवेत् ।

अस्माकम् आन्दोलने भाषायाः श्रवणभाषणपाठनलेखनरूपेषु चतुर्षु कौशलेषु श्रवणभाषणयोः निमित्तम् एव कार्यक्रमाः सन्ति, पठनलेखनयोः निमित्तं न । श्रवणभाषणे उत्साहनिर्माणं कुरुतः । उत्साहस्य रक्षणाय वर्धनाय च पठनलेखने आवश्यके । धाराप्रवाहितायै श्रवणभाषणे पर्याप्ते, परं शुद्धताशब्दसम्पत्तिशैल्यर्थं पठनलेखने अनिवार्ये । अतः सर्वेण अपि अस्माकं कार्यकर्त्रा संस्कृतेन पठनलेखनकार्याणि अधिकाधिकतया करणीयानि, प्रतिदिनं करणीयानि, सर्वाधिकाग्रहेण करणीयानि च । पदे पदे दोषप्रदर्शनं तु न करणीयम् । परं परस्परं भाषाशुद्धताविषयकचर्चा अवश्यं करणीया । नियमबोधनं करणीयम् ।

२३०० वर्षाणि यावत् या हिब्रूभाषा मृता आसीत्, तस्याः पुनरुज्जीवनसम्बद्धम् आन्दोलनं १८८० तमे वर्षे आरब्धम् । १९२५ तमवर्षाभ्यन्तरे हिब्रूभाषा व्यवहारभाषा जाता । १९४८ तमे वर्षे यदा स्वतन्त्रः इस्त्रैलदेशः प्रतिष्ठापितः जातः तदा विश्वस्य सर्वेभ्यः देशेभ्यः लक्षशः जनाः इस्त्रैलदेशं प्रति आगतवन्तः वासाय । तदा तेषां सर्वेषां हिब्रूशिक्षणाभियानं प्रचलति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्म । भाषायाः सर्वव्यापकव्यवहारेण भाषायां ये सामान्याः दोषाः भवन्ति स्म तेषां निवारणाय क्रियमाणेषु प्रयत्नेषु इस्त्रैलदेशस्य तदानीन्तनः प्रधानमन्त्री अपि दैनिकवार्तापत्रेषु भाषाशुद्धताविषयकस्तम्भलेखनाय चिन्तनाय वा प्रतिदिनं घण्टां यावत् समयं ददाति स्म । एतत् हिब्रूभाषेतिहासे उल्लिखितम् अस्ति । भाषाशुद्धता इत्ययं तावान् महत्त्वभूतः अंशः !

सामान्यदोषाणां निवारणाय शुद्धिकौमुदी, भाषापाकः इति पुस्तकंद्वयं सर्वेण अपि पठनीयम् । श्रीमतः चारुदेवशास्त्रिमहोदयस्य वाग्व्यवहारादर्शः, शब्दापशब्दविवेकः इति पुस्तकद्वयम् अपि अत्यन्तम् उद्बोधकं, परं प्रौढम् । अधीतव्याकरणशास्त्राः एव तद् अवगच्छेयुः । शब्दकोषपरिशीलनस्य अस्माकं सदभ्यासः अत्यन्तं न्यूनः । किं स्वसमीपे कश्चन कोषः अस्ति ? अस्ति चेत् प्रतिदिनम् किं सः उद्घाट्यते ?

अध्ययनशीलता इति कश्चन कठिनः, अभ्याससाध्यः, परिश्रमसाध्यः गुणविशेषः । यतः संस्कृतोन्नत्यै संस्कृतस्य संस्कृतत्वरक्षणम् अनिवार्यं, तस्मात् तदर्थम् अस्माकं सर्वेषां भाषाशुद्धतासम्पादनाय, भाषासौष्ठवसम्पादनाय च कठोरपरिश्रमः अनिवार्यः । प्रतिदिनम् अर्धघण्टां यावत् निद्रा न्यूनी-कर्तव्या एव ! कश्चन संस्कृतशिक्षार्थी आरम्भे द्वित्राणि वर्षाणि यावत् भाषाशुद्धतायाः विषये कदाचित् न चिन्तयेत् । भवतु नाम, तस्य प्रोत्साहनाय तद् वयम् अनुमन्यामहे । परं तदनन्तरं न । तदनन्तरं सर्वेणापि भाषापरिष्काराय चित्तव्यापारः, स्वेदोत्पादनं च करणीयम् एव । असंस्कृतप्रयोगः अकीर्तिकरः अस्वर्ग्यः च ।

पूर्वं कश्चन कालः आसीत् यदा मुद्रणशुद्धतावसरे विद्वांसः वदन्ति स्म - निर्णयसागरमुद्रणालयेन मुद्रितं प्रामाणिकम् इति । किं वयं तादृशं स्वप्नं पश्येम, लक्ष्यं चिन्तयेम यत् शुद्धताविषये संस्कृतभारत्याः कार्यकर्ता यद् वदति तद् प्रमाणभूतम् इति जनाः यथा वदेयुः तथा परिस्थितिनिर्माणं कुर्याम इति ?

□□

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

६.

अस्माकं श्रद्धाविश्वासौ स्याताम्

यः वेदान्तप्रवचनं करोति तस्य स्वयं श्रद्धा विश्वासः च भवेत् वेदान्ततत्त्वेषु । यः वैद्यः औषधं ददाति तस्य, यः औषधं स्वीकरोति तस्य रोगिणः च औषधे विश्वासः भवेत् यत् एतदौषधं रोगं निवारयिष्यति इति । यः मन्दिरे प्रतिदिनं पूजां करोति तस्य अर्चकस्य श्रद्धा अर्च्यमाने भगवति, मन्दिरे भगवान् अस्ति इत्यत्र च विश्वासः भवेत् । ज्येष्ठेषु अस्माकं श्रद्धामात्रं न पर्याप्तं, ते ज्येष्ठाः मम विषये उत्तमम् एव चिन्तयन्ति, मम उत्तममेव कुर्वन्ति इति विश्वासः अपि आवश्यकः । तुलसीरामायणस्य आदौ तुलसीदासः प्रार्थनाश्लोकेषु वदति – 'भवानीशङ्करौ वन्दे श्रद्धाविश्वास-रूपिणौ' इति । श्रद्धा विश्वासः च भवानी शङ्करः चेति वर्णितौ । तावत् महत्त्वभूतौ स्तः तौ । श्रद्धाविश्वासौ अस्मासु स्तः चेत् न पर्याप्तम् । तौ अस्माकं व्यवहारेषु दृश्येयाताम् । तयोः प्रकटनम् अपेक्षितम् ।

संस्कृतभाषायाम् अस्माकं श्रद्धाविश्वासौ स्तः इति किं वयं वदेम ? परं वास्तविकं चिन्तयामः चेत् 'स्तः' इत्यत्र संशयः भवति । भाषा इति शब्दस्य अर्थः कः ? 'भाष व्यक्तायां वाचि' इत्यस्मात् धातोः 'भाषा' शब्दः निष्पन्नः । भाष्यते अनया इति भाषा, न तु पठ्यते इति लिख्यते इति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

वा । किम् अस्माभिः सर्वैः संस्कृतेन भाष्यते ? भाष्यते चेत् कुत्र, कदा, कैः सह, कियता प्रमाणेन ?

किमर्थं 'व्यक्तायां वाचि' इति उक्तम् ? किमर्थं 'वाचि' इत्येतावन्मात्रं न ? किमर्थं 'व्यक्तायाम्' इति विशेषणम् ? 'ध्वनिमाध्यमेन सा प्रकटिता भवेत्, न तु लिपिमाध्यमेन' इति खलु तस्य अर्थः ? संस्कृतम् अपरं किञ्चन 'Language' इति तावदेव चिन्तनं चेत् संस्कृतेन व्यवहारः अनिवार्यः इति न वदेम । परं यदि संस्कृतं काचित् भाषा इति कथ्यते, 'भाषा' इति श्रद्धा अस्ति, 'भाषा' इति विश्वासः अस्ति, तर्हि अस्माभिः संस्कृतेन सम्भाषणं करणीयम् । पूर्वं संस्कृतं भाषा आसीत्, तया संस्कृतभाषया लोकव्यवहारः भवति स्म, संस्कृतभाषा भाषितभाषा आसीत्, बहुजनभाषा आसीत् इति श्रद्धा, इदानीं सा विरलव्यवहारा चेदपि अग्रे सा 'भाषा' भविष्यति, तथा करिष्यामि च इति विश्वासः इत्येवम् अस्माकं श्रद्धाविश्वासौ भवेताम् ।

भाषा इति कथ्यते, भाषारूपेण परं तस्याः प्रयोगः न क्रियेत चेत् विसङ्गतिः भवेत् । अतः यदि संस्कृतस्य भाषात्वे श्रद्धा विश्वासः च स्तः तर्हि सर्वेण अपि संस्कृतेन सम्भाषणं क्रियताम् । गृहे, विद्यालये, कार्यालये, समाजे सर्वत्र, सर्वदा, सर्वैः सह च संस्कृतभाषया व्यवहारः क्रियताम् ।

ये जनाः संस्कृतसम्भाषणेन अभिज्ञाताः भवन्ति तेषां कश्चन विचित्रः अनुभवः भवति । तादृशं किञ्चित् उदाहरणम् अवलोक्यताम् । संस्कृतभारत्याः कश्चन पूर्णकालिकः यदि कैश्चित् संस्कृतज्ञैः सह भवति तदा तेषु अन्यतमः संस्कृतज्ञः पूर्णकालिकेन सह तु संस्कृतेन वदति, परम् इतरैः संस्कृतज्ञैः सह प्रादेशिकभाषया वदति । पूर्णकालिकेन सह, इतरैः संस्कृतज्ञैः सह च भाषमाणः सः भाषापरिवर्तनं कुर्वन् भवति । तस्य अर्थः कः ? पूर्णकालिकः तावत् संस्कृतेन भाषणम् इति विषये आग्रहवान्, अतः तेन सह संस्कृतेन । स्वस्य तु संस्कृतं 'भाषा' अस्ति इति विषये श्रद्धा नास्ति, भाषा 'भवेत्' इति विषये विश्वासः अपि नास्ति । अतः एव इतरैः संस्कृतज्ञैः सह भाषारूपेण तस्य संस्कृतस्य प्रयोगः न क्रियते इत्येव खलु ? यदि स्वस्य भाषात्वविषयकौ श्रद्धाविश्वासौ [illegible] अभविष्यतां तर्हि इतरैः सह अपि संस्कृतेन एव अभाषिष्यत खलु ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतप्रेम्णः, श्रद्धाविश्वासयोः च जीवने प्राकट्यं/प्रकटनं भवेत् इत्यस्य अर्थः कः ? अपरम् उदाहरणं किञ्चित् परिशील्यताम् । कस्यचन संस्कृत-विश्वविद्यालयस्य २००८-२००९ तमस्य वर्षस्य किञ्चित् 'Hand Book'नामकं विश्वविद्यालयस्य दिनदर्शिकानियमादिपरिचायकं पुस्तकं, यच्च विश्वविद्यालयस्य छात्रेभ्यः प्राध्यापकेभ्यः च दीयते तत् सम्पूर्णतया आंग्लभाषया भवति । विद्यापीठस्य (विश्वविद्यालयस्य) प्रार्थनामात्रं तस्मिन् पुस्तके विद्यमानं संस्कृतम् !! सार्वजनिकेभ्यः दीयमाना सामग्री इतरभाषया भवतु नाम । परं संस्कृतज्ञेभ्यः दीयमानं तु संस्कृतेन एव भवेत् । केवलम् एकस्य विद्यापीठस्य एषा कथा न, देशे बहुत्र विद्यमानं दृश्यम् इदम् ।

विश्वविद्यालयेषु महाविद्यालयेषु च विद्यमानानि संस्कृतस्य शिलाफलकानि, प्राध्यापकानां नामफलकानि, सूचनफलकेषु सूचनापत्राणि इत्यादीनि कया भाषया भवन्ति इति दृश्यन्ताम् । अस्मदीयानां संस्कृतज्ञानामेव संस्कृतश्रद्धा कियती इति तेन अवगम्यते । न्यूनताप्रदर्शनम् अत्र उद्देशः न । एतैः द्वित्रैः उदाहरणैः वयं कं पाठं पठेम इत्येव केवलं प्रकृतप्रयासः । प्रयोगाभावे संस्कृतभाषा कथं वा विकसेत् ?

पूर्वं संस्कृतं व्यवहारभाषा आसीत् इति केवलं श्रद्धाविषयः न, तत् सत्यमपि । व्याकरणमहाभाष्ये आदितः आन्तं यानि उदाहरणवाक्यानि (पदानि वा) दर्शितानि तानि सर्वाणि लोकव्यवहारस्य वाक्यानि, न तु कस्माच्चित् काव्यात् उद्धृतानि । व्याकरणपदस्यैव अर्थः - प्रयुक्तानाम् इदम् अन्वाख्यानम् इति । 'प्रयुक्तानाम्' इत्यस्य अर्थः 'भाषया उपयुक्तानाम्' इत्येव । किञ्च, लोकोक्तयः (Idioms) लोकव्यवहारकारणेन एव उत्पद्यन्ते, न तु काव्यकारणेन । संस्कृतस्य भाषितत्वस्य विषये अधिकं ज्ञातव्यं चेत् कृपया संस्कृतभारत्याः प्रकाशनभूते 'ज्ञाने धर्मः उतः प्रयोगे' इत्यस्मिन् पुस्तके प्रारम्भिकाणि दश पृष्ठानि परिशील्यन्ताम् ।

केचन अभिप्रयन्ति - सरलसंस्कृतेन भाषणेन किं सेत्स्यति ? संस्कृतस्य शैली काचित् अस्ति, सा रक्षणीया, संस्कृतभाषायाः यत् सौन्दर्यम् अस्ति तद् रक्षणीयम् इति । अस्माकम् अपि सः एव अभिप्रायः । संस्कृतभाषायाः संस्कृतत्वं, शैली, सौन्दर्यं चेति त्रयम् अपि रक्षणीयम्, न केवलं रक्षणीयम्

CC-0, Nepal Sanskrit Academy, Kathmandu Collection

अपि तु वर्धनीयं, संवर्धनीयम् । वर्धनीयं चेत् तत्र प्रथमसोपानं भवति सरलसंस्कृतसम्भाषणम् इति । येषां द्वितीय-तृतीय-चतुर्थसोपानानां क्रमणस्य सामर्थ्यम् अस्ति तैः अवश्यमेव तानि क्रान्तव्यानि । किञ्च, आरूढ-प्रथमसोपानाः तत्रैव न तिष्ठेयुः, अग्रे सरेयुः । येषां द्वितीयतृतीयचतुर्थ-सोपानभूतानां शैलीसौष्ठवादीनां योगेन भाषाप्रयोगसामर्थ्यम् अस्ति तैः अवश्यमेव क्रियतां तादृश्याः भाषायाः प्रयोगः स्वीयवाग्व्यवहारे दैनन्दिनजीवने च । सातत्येन, साफल्येन च क्रियतां नाम । कैः नाम अवरुद्धम् ? एतदपि नास्ति, तदपि नास्ति इति न भवेत् खलु ? आहत्य सर्वैः अपि संस्कृतस्य संस्कृतत्वं रक्षणीयम् इति तु निरपवादं मतम् । लिखितत्वस्य, पाठ्यस्य च रक्षणमात्रम् अस्माकम् उद्देशः नैव खलु ? भाषात्वं, लेख्यत्वं च भवेतां संस्कृतस्य ।

छात्राः, शिक्षकाः, प्राध्यापकाः, अनुरागिणः, सामाजिकाः, महिलाः, बालाः, युवानः, भारतीयाः चेति वयं सर्वे संस्कृतस्य जनाः । परं संस्कृतं कस्य इति प्रश्नः पर्वतायते । यः 'संस्कृतं मम' इति चिन्तयति सः अवश्यमेव संस्कृतस्य प्रयोगं कुर्यात् । ममत्वस्य अनुभूत्यै, प्रकटनाय वा अन्यत् विधानं नास्ति संस्कृतप्रयोगात् ऋते ।

सर्वः अपि चिन्तयेत् - अहं संस्कृतात् ज्ञानं प्राप्नुवम्, वित्तं पदं च प्राप्नुवम्, धनं प्राप्नुवम्, समाजे प्रतिष्ठां स्थानं सम्मानं च प्राप्नुवम् । परं संस्कृतं मत् किं वा प्राप्नोत् ?

संस्कृतसाहित्येतिहासः पठ्यते पाठ्यते च । परम् इतिहासात् पाठः पठ्यते किम् ? ब्रिटिश्पूर्वकाले संस्कृतस्य, संस्कृतशिक्षणस्य च स्थितिः कथम् आसीत्, ब्रिटिश्काले ब्रिटिशोत्तरकाले च कथम् इति इतिहासः अधीतः चेत् ऐतिहासिकः पाठः अवगम्येत अस्माभिः । वयं कथम् आस्म इति यदि अज्ञास्याम तर्हि वयं यादृश्यां स्थितौ स्मः सा एषा स्थितिः अद्य नाभविष्यत् !

अद्य भारते विदेशे च विद्यमानाः वयं सर्वे इतरभाषामाध्यमेन शिक्षिताः, इतरभाषामाध्यमेन वर्धिताः च । संस्कृतभाषायाः शिक्षणमपि इतरभाषा-माध्यमेन । शास्त्राणां शिक्षणम् अपि इतरभाषामाध्यमेन, वाङ्मयस्य अन्य-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयाणां चापि अध्ययनम् अपि इतरभाषामाध्यमेन एव । संस्कृतं कदापि व्यवहारभाषा नासीत् इत्येव बोधितम् । काव्यावगमनमात्रं काव्यरचनामात्रं वा संस्कृतस्य प्रयोजनम् इति दर्शितम् । संस्कृतेन कथ्यते चेत् जनैः नावगम्यते इत्येव विश्वसितम् । संस्कृतं Classical Language इत्येव पाठितम् । आङ्ग्लेयाः संस्कृतोद्धारं कृतवन्तः इत्येव बोधिताः वयम् आ अष्टाधिक-परम्पराभ्यः । शास्त्रविषयाणां, संस्कृतकाव्यानां वा समीचीनतरया, समीचीन-तमया आङ्ग्लभाषया वर्णनसामर्थ्यमेव संस्कृतज्ञत्वस्य प्राध्यापकत्वस्य च निकषः इति वातावरणं सृष्टम् । संस्कृतग्रन्थानाम् इतरभाषाभिः अनुवादस्य एव आदर्शाः प्रदर्शिताः । संस्कृतस्य पाठनम् इतरभाषया, पठनम् इतरभाषया, लेखनम् इतरभाषया, शोधपत्राणि भाषणानि इत्यादीनि सर्वाण्यपि इतर-भाषया । अतः संस्कृतसमाजस्य, विशेषतया यूनां जीवनस्य, स्वप्नाः आकाङ्क्षाः च संस्कृतेतरभाषाः अभवन्, न तु संस्कृतम् । आङ्ग्लानुवादः आङ्ग्ल-भाषणम्, आङ्ग्ललेखनं च जीवनस्य पुरुषार्थः इति परिस्थितिः समुत्पन्ना । द्विशतं वर्षाणि यावत् एतदेव शिक्षणं जातम् इति हेतोः तादृशं शिक्षणम् अधिगतवन्तः वयं सर्वे अद्य अनुवादभिन्नम्, इतरभाषामाध्यमशिक्षणभिन्नं चिन्तयितुमेव न शक्नुमः । संस्कृतेन व्यवहारः, संस्कृतेन पाठनं, संस्कृतस्य प्रयोगः इत्यादीनाम् अङ्गीकारः तु शतयोजनदूरे अस्ति !!

एषा अनुवादमानसिकता आङ्ग्लमानसिकता च ध्वंसनीया । यथा ब्रिटिश्काले ब्रिटिशाः बाह्याः वैदेशिकाः इति बहूनां भासः एव न अभवत्, ब्रिटिशानाम् एव ते समर्थनं कुर्वन्ति स्म, तथैव अद्य संस्कृतभाषायाः अनुवादमाध्यमेन पाठनं ब्रिटिशविधिः वैदेशिकविधिः इत्येव न भासते, तस्यैव अनुसरणं क्रियते च । यथा तदानीमपि बहवः भारतीयाः ब्रिटिश-शासनस्य निष्कासनाय सङ्घर्षं कर्तुं न सज्जाः आसन्, तथा अनुवादप्रभुत्व-निष्कासनाय कष्टसहनं कर्तुं, धैर्यं कर्तुं च बहवः न सज्जाः ।

अस्माकं सर्वेषाम् अद्यत्वे आङ्ग्लभाषया अभिव्यक्तिसामर्थ्यम् अवश्यम् अपेक्षितम् । तदर्थं तद् अभ्यसनीयमेव । परं यदर्थं वयं स्मः, या संस्कृतभाषा अस्माकं जीवनस्य कारणम् अस्ति, उद्देशः अस्ति, प्रेरणामूलम् अस्ति, प्रयोजनं चास्ति तया संस्कृतगिरा वयम् अभिव्यक्तिं कर्तुं न शक्नुयाम चेत्,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शक्नुयाम चेदपि न कुर्याम चेत्, न प्रयतेमहि चेत्, न इच्छेम चेत्, तादृशेन संस्कृतविहीनजीवितेन किं सार्थक्यम् ? अस्माभिः सर्वैः आङ्ग्लविरोधः नैव करणीयः । परं संस्कृताय, संस्कृतस्य प्रयोगाय च आग्रहः अवश्यमेव करणीयः । सः आग्रहः समयोचितः, विनयपूर्वकः, अहङ्कारगन्धरहितः च भवेत् ।

काव्याध्ययनं शास्त्राध्ययनं चैव वास्तविकं संस्कृताध्ययनम् इति तु सत्यम् एव । परं तयोः अध्ययनाय पात्रताप्राप्त्यै भाषाभ्यासः अपेक्षितः । भाषाभ्यासः भाषाप्रयोगेण कर्तव्यः । विषयबोधनं प्रवचनेन, भाषाबोधनं प्रयोगेण ।

भाषाप्रयोगौ भवानीशङ्करौ इति अस्माकं श्रद्धाविश्वासौ । भाषां विना प्रयोगः न भवति, प्रयोगं विना भाषा नैव भवति ।

प्रवाहाभावे यथा केऽपि नदीं नैव उपगच्छन्ति, तथैव प्रयोगाभावे केऽपि भाषां नैव अधिगच्छन्ति ।

भवने पिञ्जाः सन्ति, तन्त्र्यः सन्ति, व्यजनानि दीपाः च सन्ति । तानि परस्परं सुसम्बद्धानि च । परं विद्युत्प्रवाहमात्रं नास्ति । तथैव संस्कृतभवने ग्रन्थाः सन्ति, कक्ष्याः सन्ति, अध्यापकाः छात्राः च सन्ति । परन्तु व्यजनानि न चलन्ति, दीपाः न प्रकाशन्ते च । यतः भाषाप्रवाहः नास्ति । वाक्प्रवाहे (वाक्प्रयोगे) आरब्धे अध्यापकाः ज्ञानवायुं सञ्चारयेयुः, छात्राः च देदीप्यमानाः सन्तः अखिलं विश्वं प्रकाशयेयुः ।

❑❑

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

७.

किम् एतैः प्रताडनैः नालम् ?

प्रसङ्गः हिमाचलप्रदेशस्य राज्यसम्मेलनस्य । स्थलं ज्वालामुखी-श्रीक्षेत्रम् । सितम्बर्मासस्य १४ दिनाङ्कः । सम्मेलने भाषमाणः हिमाचलप्रदेशस्य शिक्षामन्त्री स्वस्य सर्वकारस्य संस्कृतपरां नीतिं वर्णयितुम् उद्युक्तः सन् 'सर्वकारेण विद्यालयेषु १८,००० शिक्षकाणां नियुक्तिः करिष्यते' इति उक्तवान् । सम्मेलने उपस्थिताः उपद्विशताः संस्कृतज्ञाः युवकाः युवतयः च, सार्धैक-शताधिकाः संस्कृतशिक्षकाः च नियुक्तिवार्ताश्रवणेन आनन्दिताः सन्तः मुहुः करताडनम् अकुर्वन् । अष्टादशसहस्रशिक्षक-नियुक्तिः यदि स्यात् तर्हि बहूनां संस्कृतशिक्षकाणां नियुक्तिः अपि भवेत् इति आशाम् अकुर्वन् च ।

मन्त्रिणः भाषणं यावत् समाप्तं तावता अहम् उत्थाय ध्वनिवर्धकं स्वीकृत्य सविनयं मन्त्रिणं पृष्टवान् – ''नियोक्ष्यमाणेषु अष्टादशसहस्रे शिक्षकेषु कतीनां संस्कृतशिक्षकाणां नियुक्तिः भवेत् ?'' इति ।

वयोवृद्धोऽपि तीक्ष्णमतिः मन्त्री राजनैतिकम् उत्तरम् अददात् – ''प्रायः उपद्विशताः भाषाशिक्षकाः'' इति ।

पुनः मया पृष्टम् – ''हिमाचले विद्यालयेषु तु पञ्चानां भाषाणां पाठनस्य व्यवस्था अस्ति । तर्हि द्विशते भाषाशिक्षकेषु संस्कृतशिक्षकाः कति स्युः ?'' इति ।

तदा [illegible] मन्त्री अवदत् – ''संस्कृत-
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
शिक्षकाः अष्टादश स्युः, किं करवाणि ? अस्माभिः जगता

सह चलनीयम् अस्ति, अद्य तु सर्वत्र 'आइ.टी.' एव पुरस्क्रियते'' इति ।

प्रसङ्गः कर्णाटकराज्यस्य संस्कृतशैक्षिकसम्मेलनस्य । स्थलम् अक्षरं, बेङ्गलूरु । दिनाङ्कः सितम्बर्मासस्य २५ तमः । सम्मेलने भाषमाणः कर्णाटकस्य शिक्षामन्त्री, कर्णाटके संस्कृतविकासाय सर्वकारेण कृतान्, क्रियमाणान् च संस्कृतपरान् उपक्रमान् वर्णयन् - ''माध्यमिकविद्यालयेषु विद्यमानेषु द्विशते रिक्तसंस्कृतशिक्षकपदेषु ५९ पदानि पूरयितुं सूचितवान् अस्मि'' इति अवदत् । यद्यपि सः शिक्षामन्त्री इतरभिन्नः, प्रयत्नशीलः, संस्कृतपरश्च, तथापि सः यस्यां व्यवस्थायाम् अस्ति सा व्यवस्था किञ्चित् परिशील्यताम् । तस्य प्राथमिक-माध्यमिक-शिक्षामन्त्रिणः विभागे आहत्य २,५०,००० शिक्षकाः सन्ति । तेषु सार्धद्विलक्षाधिकशिक्षकपदेषु द्विशतस्य शिक्षकपदानां का गणना ? इतोऽपि १४१ पदानि पूरितानि यदि अभविष्यन् तर्हि ७,७३५ कोटिरूप्यकपरिमितव्यययुक्तस्य तदीयमन्त्रालयस्य वार्षिकार्थसङ्कल्पनायां का हानिः अभविष्यत् ?

केवलम् एतावद् एव न । एकादशद्वादशकक्ष्ययोः पाठनाय इदानीं १२०० व्याख्यातॄणां नियुक्तेः या घोषणा जाता अस्ति तत्र संस्कृतपदानि केवलं नव ! इतोऽपि महत्तरं परिलक्ष्यताम् । सद्यः कर्णाटके 'पब्लिक् सर्वीस् कमिषन्'द्वारा २००० व्याख्यातॄणां नियुक्तिः जाता । तत्र संस्कृत-व्याख्यातृपदम् एकमपि नास्ति !

विषयः मध्यप्रदेशस्य । त्रिभ्यः वर्षेभ्यः पूर्वं तत्रत्यः वित्तमन्त्री आयव्यय-पत्रकसत्रे भाषणावसरे उद्घोषणं कृतवान् - '९०० संस्कृतशिक्षकाणां नियुक्तिः करिष्यते' इति । अद्यावधि एका अपि नियुक्तिः न जाता । मध्यप्रदेशे षष्ठसप्तमाष्टमकक्ष्यासु २६,००० विद्यालयेषु ९५% छात्राः संस्कृतं पठन्ति तृतीयभाषारूपेण । परं सम्पूर्णे राज्ये एकम् अपि संस्कृतशिक्षकपदं नास्ति आ शताधिकवर्षेभ्यः । आङ्ग्ल-गणित-विज्ञान-हिन्दी-शिक्षकाः एव संस्कृतं पाठयन्ति !

कथा पञ्जाब्राज्यस्य । राज्ये आहत्य केवलं त्रयोदशसु महाविद्यालयेषु संस्कृत 'स्नातकप्रतिष्ठा 'पदव्याः (बि.ए. आनर्स) 'स्नातक' पदव्याः (बि.ए.) च निमित्तं पाठनव्यवस्था अस्ति । तत्र प्रतिमहाविद्यालयं व्याख्यातृपदद्वयम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इदानीम् अवशिष्टम् अस्ति । किन्तु कति स्थानानि पूर्णानि इति मा पृच्छ्यताम् । इदानीं तत्रत्येन शिक्षामन्त्रिणा निर्णयः कृतः – प्रतिमहाविद्यालयम् एकमेव पदं पर्याप्तम् इति । त्रयोदशानां पदानां कर्तनेन राज्यकोशस्य कियान् लाभः !

केरलराज्यस्य शिक्षामन्त्रालयेन प्रस्तावः कृतः – 'नवमदशमकक्ष्ययोः संस्कृतं न आवश्यकम्' इति । हरियाणाराज्ये वर्षद्वयात् पूर्वं नवमदशमयोः संस्कृतं निष्कासितम् । अद्यावधि अस्मत्संस्कृतबान्धवैः न्यायालयोऽपि न प्रार्थितः तदादेशपत्रस्थगनाय !

विश्वविद्यालयानुदानायोगस्य नियमानुसारं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन मध्यमापर्यन्तकक्ष्यायुक्ताः संस्कृतपाठशालाः यदा परित्यक्ताः तदा उत्तरप्रदेशस्य तदानीन्तनमुख्यमन्त्रिणा श्रीमता राजनाथसिंहेन २००२ तमे वर्षे उ.प्र. संस्कृतमाध्यमिकशिक्षापरिषद् संस्थापिता, अनुदानसहिताभ्यः अनुदान-रहिताभ्यः च ७२५ पाठशालाभ्यः मान्यता प्रदत्ता च । तदा २८४ पाठ-शालाः मान्यताम् आप्नुवन्, परं वित्तसाहाय्यविहीनविद्यालयत्वेन । आ पञ्चभ्यः वर्षेभ्यः विद्यमानां तेषाम् अभियाचनाम् अङ्गीकृत्य २००७ तमे वर्षे मुख्यमन्त्री श्री मुलायमसिंहः शासनसभानिर्णयद्वारा अनुदानदानम् उद्घोषित-वान् । परं श्रीमुलायमसिंहेन प्रदत्तं तत् अनुदानम् इदानीं चतुर्भ्यः मासेभ्यः पूर्वं निरस्तीकृतम् अस्ति वर्तमानमुख्यमन्त्रिण्या मान्यया मायावत्या । तत्र कारणं दत्तम् अस्ति – 'उर्दूविद्यालयानां कृते अनुदानम् इतोऽपि न दत्तम् अस्ति । तदर्थं धनं नास्ति । अतः संस्कृतविद्यालयेभ्यः अपि अनुदानं न दीयताम्' इति ।

उत्तरप्रदेशे आ दशाधिकवर्षेभ्यः कस्मैचिद् एकस्मै अपि नूतनाय संस्कृत-विद्यालयाय मान्यता नैव दत्ता इति तु गौणा कथा । इदानीं लखनोनगरे तेषां २८४ बाधितवित्तसाहाय्यानां विद्यालयानां संस्कृतशिक्षकाणां सत्याग्रहः प्रचलति । समाजः तैः संस्कृतशिक्षकैः सह नास्ति, तथा च धर्मसंस्कृतिसंरक्षकाः (?) न सम्मिलिताः सत्याग्रहेण सह इति तु अवगम्या दशा । परं दुःखस्य विषयः नाम – अन्ये संस्कृतशिक्षकाः, प्राध्यापकाः, संस्कृतबान्धवाः वा सहयोगाय अग्रे नागताः इतोऽपि !

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उत्तराखण्डे गते वर्षे राज्यसर्वकारेण उद्घुष्टम् – 'संस्कृतभाषा उत्तराखण्डस्य द्वितीयराजभाषा करिष्यते' इति । परं तदर्थं सार्वत्रिकरूपेण लोकानां भाषा-शिक्षणस्य यद् आन्दोलनम् अपेक्षितं तद् उत्तराञ्चलस्य संस्कृतशिक्षकैः छात्रैः च आरब्धं किम् ? पाठनकार्यं तु संस्कृतज्ञैः एव करणीयं भवति । यावद् संस्कृतज्ञाः न जाग्रति तावत् सर्वकारः अपि किं वा कुर्यात् ?

केन्द्रसर्वकारेण संस्कृतसप्ताहः घोषितः । सप्ताहात्मकाः कार्यक्रमाः, तेषां प्रचारः च संस्कृतज्ञैः एव करणीयः । कियन्तः संस्कृतज्ञाः एतस्मिन् कार्ये आत्मानं नियोजितवन्तः ?

मायावती केन धैर्येण संस्कृतपाठशालाभ्यः अनुदानं निराकृतवती ? तेन धैर्येण यद् संस्कृतज्ञाः परमसज्जनाः, वीथीं नैव अवतरिष्यन्ति इति, तेन स्पष्टज्ञानेन यद् संस्कृतज्ञानां सङ्घटितशक्तिः नास्ति इति, तेन एव अवबोधेन यत् संस्कृतज्ञाः कदापि अपमानिताः, व्रणिताः च सन्तः अपि प्रतिरोधं नैव कुर्वन्ति इति, तेन विश्वासेन यत् चाणक्याः पुनरपि नैव उद्भविष्यन्ति इति, तेन आश्वस्तभावेन यद् संस्कृतं घातितं चेत् अपि हिन्दुसमाजः नैव जागरिष्यति, न वा संस्कृतज्ञाः क्रियाशीलाः भूत्वा समाजं जागरयिष्यन्ति इति । एताः मायावत्यः प्रतिराज्यं सन्ति, भविष्यन्ति च, यावत् वयम् एवमेव तिष्ठेम, यावत् वयं संस्कृताय किमपि मूल्यं दातुं न सज्जाः, यावत् वयं स्वयं समयं धनं शक्तिं च संस्कृताय व्ययीकर्तुं न मनः कुर्याम तावत् ।

प्रतिदिनं प्रतिराज्यं संस्कृतस्य प्रताडनं भवति । किं वयं जीवन्तः तूष्णीं तिष्ठेम ? कश्चन शिक्षामन्त्री वदति – 'अस्माभिः जगता सह चलनीयम् अस्ति' इति । जगता सह चलनीयं चेत् किमर्थं संस्कृतस्य बलिपशूकरणम् ? किमर्थं गणित-विज्ञान-सङ्गीत-हिन्दी-कन्नड-मलयालादीनां न ?

भोः, संस्कृतप्राणाः संस्कृतज्ञाः ! अस्माकं जागरणं कदा भवेत् ? किम् एतैः प्रताडनैः न अलम् ? गुजराते दशमकक्ष्यायां सङ्गणकशिक्षणे दातव्ये, तदर्थं स्थाने कल्पनीये, हिन्दीसंस्कृतयोः वैकल्पिकत्वं कृतम् । हानिः जाता संस्कृतस्य । एतस्मिन् वर्षे आन्ध्रराजकीयमाध्यमिकविद्यालयेषु सि.बि.एस्.सि. पाठ्यपुस्तकानि आरब्धानि । अग्रे हानिः भविष्यति संस्कृतस्य । तस्मिन् एव आन्ध्रप्रदेशे राजकीयजूनियरकलाशालाः आरब्धाः । फलस्वरूपे अन्ये सर्वे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयाः सन्ति, ऋते संस्कृतात् ! कथमेतत् सर्वं सहमानाः स्मः ?

संस्कृतशिक्षकाणाम् अस्माकं पुत्रपौत्रादयः सर्वे इञ्जिनियर्स्, सङ्गणकज्ञाः, वैद्याः, एम्.बि.ए.पदवीधराः वा स्युः, अतः संस्कृतशिक्षकपदानि विलुप्तानि चेत्, न कल्पितानि चेद्वा अस्माकं वैयक्तिकी हानिः कापि न भवेत् । परं वयं संस्कृतपोषिताः स्मः । संस्कृतपोषणमपि अस्माकमेव कर्तव्यम् । प्रश्नः कर्तव्यनिर्वाहस्य । अतः अस्माकं बुद्धिव्यापारः स्यात् कार्यनीतौ । चिन्तनं स्यात् दशानां वर्षाणां कार्ययोजनायाम् । सज्जता स्यात् वैयक्तिकं सुखं परित्यज्य कष्टपरम्परायाः आलिङ्गनाय, दीर्घकालीनाय सङ्घर्षाय, कदाचित् आवश्यकतायां सत्याम् आर्थिकदरिद्रतायाः परिणयाय च ।

□□

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

८.

महत्ता स्वनाम्नः लोपे ?

प्रसङ्गः - महाराष्ट्रशासनेन व्यवस्थापितस्य महाराष्ट्रराज्यरङ्गभूमिगौरवपुरस्कारस्य प्रथमवर्षीयस्य पुरस्कारप्रदानकार्यक्रमस्य । स्थानं - नागपुरस्य वसन्तरावदेशपाण्डेसभा-गृहम् । ४.१२.२००६ दिनाङ्कः । मुख्यमन्त्रिणः, सांस्कृतिककार्यसञ्चालनमन्त्रिणः, अन्येषां बहूनां मन्त्रिणां, विद्वज्जनानां, गण्यानां, रङ्गभूमिप्रियाणां च उपस्थितिः । सभाभवनं पूर्णम् आसीत् । लक्षरूप्यकैः, स्मरणिकया, मानपत्रेण च तत्र पुरस्कृतः अभवत् विख्यातः मराठीनाटककारः, नटश्रेष्ठः श्रीप्रभाकररावपणशीकरः ।

श्रीप्रभाकरपणशीकरमहोदयः इदानीं पञ्चसप्ततिवर्षीयः । रङ्गभूमिजीवनस्य तु पञ्चाशत् वर्षाणि । सः नाटकेषु अभिनेता, नाटकानां निर्माता च । उभयक्षेत्रे अपि गतिः तस्य वैशिष्ट्यम् । तस्य नाम महाराष्ट्रे रङ्गभूमेः पर्यायवाचि । तेन प्रशिक्षिताः नटाः निदेशकाः च असङ्ख्याः । तेषु बहवः अद्य सुप्रसिद्धाः अपि । 'नाट्यसम्पदा' इत्येषा तदीया संस्था । गतेषु पञ्चाशति वर्षेषु तेन षष्ट्यधिकानि नाटकानि प्रस्तुतानि । तेषां च प्रदर्शनम् अष्टसहस्राधिकवारं जातं स्यात् । तादृशं नगरम् एव प्रायः महाराष्ट्रे न स्यात्, यत्र च नाट्यसम्पदासंस्थया नाटकं प्रदर्शितं न स्यात् । तस्य पणशीकरमहोदयस्य सम्मानं कुर्वन् मुख्यमन्त्री उक्तवान् यत् श्री प्रभाकरपणशीकरः कश्चन चलन् रङ्गभूमिविश्वविद्यालयः इति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुरस्काराः व्यक्तीनां नाम्ना अपि भवन्ति । यथा -

नोबेलपुरस्कारः, महात्मगान्धिशान्तिपुरस्कारः, भटनागारविज्ञानाविष्कार-पुरस्कारः, दादाफाल्केचलच्चित्रपुरस्कारः इत्यादयः । एताम् एव परम्पराम् अनुसरता महाराष्ट्रसर्वकारेण तत्र कार्यक्रमे घोषणा कृता यत् अग्रिमवर्षतः एषः महाराष्ट्रराज्यरङ्गभूमिजीवनगौरवपुरस्कारः श्री प्रभाकरपणशीकरनाम्ना प्रदास्यते इति । सामान्यतः सर्वः अपि स्वस्य नाम चिरस्थायि भवेत् इति इच्छति, तदर्थं धनदानं कृत्वा शिलासु, फलकेषु वा नाम लेखयति, सर्वविधयत्नं करोति च । परन्तु अत्र दृश्यतां कामपि असाधारणीं महत्ताम् !

सम्माननोत्तरम् अभिभाषमाणः श्रीमान् प्रभाकरपणशीकरः उक्तवान् - ''अहं तु रङ्गभूमेः कश्चन सेवकः । एतत् सम्माननं मम न, रङ्गभूमेः सम्माननम् एतत् । अग्रिमात् वर्षात् मम नाम्ना पुरस्कारदानात् अपि रङ्गभूमिक्षेत्रे मत्तः पूर्वं जन्म प्राप्तवतः श्रीमतः अण्णासाहेबकिर्लोस्करस्य नाम्ना दानं वरम् ।''

अद्यापि अस्ति एतादृशः महापुरुषः कलाविद् यः, महाराष्ट्रराज्यस्य सर्वश्रेष्ठः रङ्गभूमिपुरस्कारः स्वस्य नाम्ना मास्तु, शाश्वताय अन्यस्य नाम्ना भवतु इति चिन्तयिता ! महत्ता नाम एषा !!

अवसरे प्राप्ते अपि स्वस्य नाम्नः अनुल्लेखेच्छा एषा निस्स्पृहता इति तु एकः अंशः । अन्यः अंशः तु - मत्तः ज्येष्ठः अस्ति, अर्थात् अहं कनीयान् इति विनम्रता । किञ्च सम्माननमिदं न मम, रङ्गभूमेः इति निरहङ्कारिता ।

कश्चन सामान्यः अपि जनः कथं वा महान् भवेत् ? एतादृशेन एव चिन्तनेन व्यवहारेण च - ''मम मास्तु, तस्य/भवतः भवतु । अहं न, भवान्/सः एव ।'' अस्माकं दैनन्दिने जीवने एतादृशाः प्रसङ्गाः बहवः आगच्छन्ति, यत्र अस्माकं महत्तायाः परीक्षा भवति । प्राप्तस्य, प्राप्यमाणस्य वा अवसरस्य त्यागः, इतरेभ्यः दानं, स्वस्य लोपनं कृत्वा इतरेषां पुरस्करणम् इत्यादिकं सर्वमपि जनं महान्तं करोति ।

परं केचन एतादृशाः कदाचित् भवेयुः, ये स्वस्मै पर्याप्तं महत्त्वं न दत्तम्, अतः मम नाम, स्थानम्, अवसरः वा मास्तु इति खेदपूर्णं चिन्तनं कुर्वन्तः इतरेभ्यः अवसरदानस्य नाटकं कुर्वन्ति इति । तेषां सा कृतिः महत्ताद्योतिका न, अपि तु सङ्कुचिततादर्शिका एव ।

Nepal Sanskrit Academy, Kathmandu Collection

यः सभासु सर्वदा श्रोतृभिः सह उपविशति, तेन तु मञ्चे उपवेशनस्य किं माहात्म्यम् इति न अवगम्यते । किञ्च, सः मञ्चे उपवेशनं सहजतया न काङ्क्षति । किन्तु यः कतिपयवारं मञ्चे उपविष्टवान् सः एव मञ्चे उपवेशनरूपेण 'आकर्षण'ज्वरेण ग्रस्तः भवति । सः तां सभां न आगच्छति, यत्र मञ्चस्थः आसन्दः तस्मै न कल्प्येत ।

यस्य नाम पूर्वं बहुत्र इतरैः कतिपयवारम् उद्धृतं भवति तस्य एव अनन्तरकाले वारं वारम् 'इतरैः मम नामोल्लेखः न कृतः' इति दुःखं भवति, अथवा नामोल्लेखः क्रियेत इति स्पृहा भवति, अथवा निमन्त्रणपत्रे वार्तापत्रे वा सः स्वनाम्नः मुद्रणाय यतते ।

यः कस्मिंश्चिद् उत्तरदायित्वे पदे वा स्थित्वा कार्यं निर्वहति सः पश्चात् उत्तरदायित्वं पदं वा नास्ति चेत् तेन विना कार्यं कर्तुं न शक्नोति । न्यूनतरपदम् अपि न सहते । तदा स्वस्य प्रतिष्ठायाः चिन्ता भवति तस्य – अहं प्रान्तसंयोजकः आसम्, इदानीं विभागसंयोजकत्वम् एतत् कथम् ? मम अपमाननाय एतद् इति । वस्तुतः मानः पदमहत्त्वेन, उत्तरदायित्वेन, क्षेत्रविस्तारेण वा न भवति । प्रत्युत जनविशेषस्य गौरवं तस्य प्रतिदिनं समय-दानस्य, परिश्रमस्य, त्यागस्य च परिमाणानुगुणम् अधिकं न्यूनं वा भवति ।

यदा कश्चन स्वस्य नाम्नः, स्थानस्य, पदस्य, प्रतिष्ठायाः वा चिन्तनम् ईषदपि अकृत्वा कार्यमात्रं चिन्तयति, करणीयं सूचितं वा कुर्वन् भवति, तदा प्रतिष्ठायशस्स्थानपदादीनि स्वयं तस्य पृष्ठतः आगच्छन्ति । यः कीर्त्यर्थं, प्रतिष्ठार्थं, स्वस्य अहङ्कारतृप्त्यर्थं च किञ्चन कार्यं करोति तस्य तद् कार्यं पुण्यदं न भवति । निष्कामं कर्म एव पुण्यप्रदम् । मानवेन परोपकारः करणीयः इत्येतदर्थं तादृशं कार्यं करणीयम् । सः च उपकारः धर्मबुद्ध्या करणीयः, न तु स्वार्थप्रेरणया ।

कश्चन सामान्यः जनः स्वस्य जीवने किञ्चन उदात्तम् उन्नतं च लक्ष्यं स्वीकृत्य लक्ष्यपूर्त्यर्थं दीर्घकालं यावत् – ३०-४० वर्षाणि यावत् – निष्कामम् अविरतं च कार्यं कुर्वन् भवति, बाधासु आगतासु न विरमति, न प्रतिगच्छति, न अपसरति, न मन्दायते वा । सदा ध्येयपथे पुरः सरन् सः महत्तायाः उत्तुङ्गताम् अपि आरोहन् भवति । अन्ते महान् भवति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कश्चन परिश्रमेण महान् भवेत् । अन्यः समर्पणेन, अपरः त्यागेन, इतरः शिष्टव्यवहारेण, ज्ञानेन, अध्ययनेन, विनयादिगुणभूषणैः वा । परं सर्वः अपि कार्यसातत्येन, अखण्डसाधनया, प्रदीर्घेण तपसा च महान् तु भवेत् एव । प्रशासने, वाणिज्यसंस्थासु च स्थानं पदं च जनाय शक्तिं ददाति । परन्तु सामाजिकक्षेत्रे सङ्घटनेषु च जनाय तस्य त्यागः तपः अनामिकता च शक्तिं ददाति, न तु स्थानं पदं वा । पूर्वत्र नियमावली तस्मै अधिकारं ददाति, उत्तरत्र तु तस्य जीवनसाधना तम् अधिकारेण विभूषयति ।

सर्वे कार्यं कुर्वन्ति एव । किं कार्यं कुर्वन्ति इति प्रश्नः । केचन संस्कृतस्य प्रचारं कुर्वन्ति, केचन स्वस्य एव प्रचारं कुर्वन्ति, केचन संस्कृतस्य स्वस्य च प्रचारं कुर्वन्ति । अस्माभिः प्रथमगणीयैः भवितव्यम् । संस्कृतस्य प्रचारः भवेत् । संस्कृतभारत्याः प्रचारः भवेत् । स्वस्य नैव, नैव, नैव भवेत् च ।

यः स्वं विलोपयितुं प्रयतते तस्य अहङ्कारः क्रमशः न्यूनः भवति । स्वनामस्तुतिश्रवणेन पठनेन वा अहङ्कारः वर्धते । अतः तद्विपरीतप्रभावाय स्वनाम्नः लोपः, अर्थात् अदर्शनं, तन्नाम स्वस्य नाम्नः अश्रवणम् अपठनं च यथा भवेत् तथा प्रयतनीयम् ।

पुत्रैषणा, वित्तैषणा, लोकैषणा चेति जनानाम् एषणात्रयम् । एतासु तिसृषु इच्छासु लोकैषणा इति या कीर्तिस्पृहा अस्ति सा सर्वस्य स्वाभाविकी एव । तया स्पृहया (कीर्त्याकाङ्क्षया) कार्यम् अकृत्वा (भवतः कीर्त्याकाङ्क्षा अस्ति उत न इति परीक्षितुम् इतःपरं भवान् सर्वदा स्वं पृष्ठतः स्थापयतु, स्वनाम निवारयितुं प्रयतताम् । तदा च परिशीलयतु - भवतः मनः कीदृशं कष्टम् अनुभवति इति ।) धर्मबुद्ध्या, कर्तव्यबुद्ध्या च कार्यं क्रियते चेत्, किञ्च यदा यदा यशः लभ्यते तदा तदा तद् यशः इतरेभ्यः दीयते चेत्, सम्पूर्णतया अनामिकेन भवितुं प्रयत्यते चेत् च तदा तादृशेन प्रयत्नेन, तेन जनेन क्रमशः एषणाः जेतुं शक्यन्ते ।

स्पृहाम् अहङ्कारं च जेतुम् इच्छुकाः जनाः अनामिकतायाः अभ्यासं कुर्युः । सः अभ्यासः एव चित्तशुद्ध्यर्थं लक्ष्यपूर्त्यर्थं च श्रेष्ठः मार्गः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

९.

संस्कृतेन अनुवादः समयस्य आवश्यकता

भारतस्य प्राचीनान् संस्कृतपाण्डुलिपिग्रन्थान् पश्यामः चेत् ज्ञायते यत् आङ्ग्लानाम् आगमनात् पूर्वं संस्कृतेन प्रणीतानां ग्रन्थानां काव्यनाटकादीनां च व्याख्यानानि संस्कृतेन एव भवन्ति स्म, न तु लोकभाषाभिः इति । ब्रिटिशशासनकाले आङ्ग्लेयानाम् ऐरोपीयाणां च अवगमनाय आङ्ग्लजर्मन्-प्रभृतिभिः भाषाभिः अनुवादकार्यम् आरब्धम् । आङ्ग्ल-शिक्षाव्यवस्थायां यथा आङ्ग्लभाषापाठनम् अनुवादविधिना भवति स्म, तथा संस्कृतभाषाशिक्षणम् अपि अनुवादविधिना आरब्धम् । शिक्षणविधेः कारणतः, किञ्च आङ्ग्लेयानाम् आङ्ग्लशिक्षणं प्राप्तवतां भारतीयानाम् आवश्यकता-कारणतः च संस्कृतेन उपनिबद्धानां काव्यनाटकादीनां शास्त्र-ग्रन्थानां च आङ्ग्लभाषया अनुवादः निरन्तरं प्राचलत्, पश्चात् भारतीयभाषाभिः अनुवादः अपि आरब्धः । एतेन संस्कृत-वाङ्मयस्य महत्त्वं जनैः स्वल्पमात्रेण अवगतम् । संस्कृतविषये आदरभावः उत्पन्नः च । परन्तु काश्चन हानयः अपि अभवन् ।

द्विशतं वर्षाणि यावत् संस्कृतशैक्षिकजगतः अवधानकेन्द्रम् आसीत् 'इतरभाषाभिः अनुवादः' इति । संस्कृतस्य प्रकाशनोद्यमः नाम अनुवादसहितानां, केवलानुवादानां वा प्रकाशनम् इति आसीत्, अस्ति च । तेन च इतरभाषाभिः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

अनुवादस्य तज्ज्ञता संस्कृतज्ञानाम् अभवत् । संस्कृतेन कृतिनिर्माणं, संस्कृतेन लेखनं, संस्कृतेन परिचर्चा च न अभवत् । संस्कृतेन व्यवहारः न्यूनः अभवत् । संस्कृतविषये इतरभाषासु चर्चा अधिका अभवत् । अतः संस्कृतभाषा नैव विकसिता, अपि तु दिने दिने ह्रासं गता । संस्कृताध्यापकानां छात्राणां च संस्कृतेन अभिव्यक्तिसामर्थ्यं नैव अवर्धत । किञ्च, संस्कृतस्थाः विषयाः इतरभाषावाङ्मयम् अपोषयन् । किन्तु इतरभाषाणाम् आधुनिकाः विषयाः संस्कृतवाङ्मये न आगताः । संस्कृतेन प्रदानं केवलं कृतम्, आदानं नैव कृतम् । (यत्किञ्चित् आदानं जातं तत् तु न गणनार्हम् ।)

उद्देशानुगुणं कार्ययोजना भवति । आङ्ग्लेयानाम् उद्देशः आसीत् - संस्कृतसाहित्यस्य अवगमनम् इति । अतः ते अनुवादं कारितवन्तः, अनुवादकरणमेव पाठितवन्तः च । अस्माकम् इदानीम् उद्देशः अस्ति - संस्कृतभाषायाः सर्वतोमुखः विकासः, भाषायाः साहित्यस्य शास्त्राणां च उज्जीवनं चेति । तदर्थं संस्कृतेन पठनं भवेत्, न तु इतरभाषाभिः अनूदितानां ग्रन्थानां पठनम्, अर्थात् इतरभाषाभिः पठनम् ।

संस्कृतच्छात्राणां संस्कृतशिक्षकाणां च संस्कृतभाषाप्रयोगसामर्थ्यं, संस्कृतभाषासौष्ठवं च नास्ति इत्यत्र किं कारणम् इति पृष्टे सति उत्तरद्वयं भवति - संस्कृतभाषया १. पठनं न भवति २. लेखनं न भवति इति । इतरभाषाभिः तु वयं प्रतिदिनं वृत्तपत्राणि, कथापुस्तकानि, बहुविधं मनोरञ्जकसाहित्यं च पठामः । तथा अस्माकं पठनाय संस्कृतेन रचितं ललितम् आधुनिकं समकालिकं साहित्यं नास्ति । संस्कृतशिक्षणे माध्यमिकशिक्षातः आरभ्य स्नातकोत्तरशिक्षापर्यन्तं संस्कृतेन लेखनम् इत्येतत् नैव भवति । पारम्परिकपाठशालासु तावत् वर्षान्ते परीक्षासमये छात्राः लेखनीपाणयः भवन्ति, अन्यथा आवर्षं कक्ष्यासु तेषां श्रवणमात्रं कार्यम् ।

संस्कृतभारत्याः द्वारा क्रियमाणे संस्कृतसम्भाषणान्दोलनेऽपि इमां न्यूनतां पश्यामः । शिक्षार्थिनां श्रवणभाषणयोः कार्यं भवति, पठनलेखनयोः कृते पर्याप्ताः कार्यक्रमाः न सन्ति । अतः एव तेषां भाषास्तरः कञ्चन घट्टं प्राप्य तत्र स्थगितं भवति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किञ्च नवसाहित्यनिर्माणं न भवति इति कारणतः नवशब्दनिर्माणप्रक्रिया

अपि अवरुद्धा अस्ति ।

कस्याञ्चिदपि भाषायाः विकासाय पञ्च आवश्यकताः भवन्ति इति श्रूयते -

१. तया भाषया भाषणकर्तारः बहवः जनाः ।
२. शिक्षण-प्रशासन-वाणिज्यसूचनादीनां माध्यमरूपेण तस्याः भाषायाः प्रयोगः ।
३. समकालिकसाहित्यम् ।
४. नवशब्दनिर्माणसातत्यम् ।
५. तन्त्रज्ञानस्य स्वीकारः (adaptation of the technology) इति ।

अत्र समकालिकं साहित्यम् इति विषयः अस्माभिः अवधेयः अस्ति ।

गते शतके भारतीयासु भाषासु यदा आधुनिकं साहित्यं निर्मितम् अभवत् तदा तत् कार्यं त्रिषु सोपानेषु अभवत् ।

१. प्रथमं तावत् आङ्ग्लभाषया प्रणीतस्य साहित्यस्य भारतीयभाषया अनुवादः कृतः ।
२. पश्चात् आङ्ग्लकृतीनाम् अनुकरणं कृत्वा स्वतन्त्रतया कृतिरचना कृता ।
३. अनुवादानुकरणाभ्यां कृतलेखनाभ्यासाः लेखकाः, अनुवादानुकरणयोः द्वारा निर्मितस्य साहित्यस्य पठनेन प्राप्तोत्साहाः लेखकाः च सर्जनात्मककृतीनां प्रणयनं कृतवन्तः ।

एवं सर्वासु अपि भारतीयभाषासु प्रारम्भे महता प्रमाणेन अनुवादकार्यम् अभवत् । तेन तासां भाषाणां शब्दभाण्डारम् अवर्धत, नवशैल्यः समुत्पन्नाः, वाचकाः निर्मिताः, लेखकाः जाताः, प्रकाशनोद्योगः (Publishing Industry) समारब्धः च ।

अद्य संस्कृतक्षेत्रे अपि समयस्य आवश्यकता अस्ति संस्कृतेन अनूदितस्य साहित्यस्य निर्माणम् इति । येषां संस्कृतज्ञानां संस्कृतेन निर्दुष्टतया लेखनस्य सामर्थ्यम् अस्ति ते सर्वे अपि संस्कृतेन अनुवादकार्यं स्वीकुर्युः । लघुकथाः, दीर्घकथाः (उपन्यासाः), ऐतिहासिककथाः, बालकथाः, विज्ञानसाहित्यं, वैचारिकसाहित्यं, व्यक्तित्व-नायकत्व-विकाससाहित्यम् इत्यादिकस्य सर्वविधस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपि साहित्यस्य, वर्तमानजगतः सर्वविधविषयाणां पुस्तकानां च अनुवादः कर्तव्यः । यस्याः कस्याश्चित् अपि शैक्षिक-सामाजिक-सांस्कृतिक-संस्थायाः सहयोगं स्वीकृत्य कस्यचित् वणिजः धनिकस्य वा धनसाहाय्यं प्राप्य, स्वीयेन एव धनेन वा प्रकाशनं करणीयम् । संस्कृतभारती अपि महता प्रमाणेन एतादृशानां पुस्तकानां प्रकाशनं चिन्तयन्ती अस्ति । प्रकाशनम् आरब्धवती अस्ति अपि ।

क्रेतॄणां पठितॄणां च निर्माणानन्तरम् अनुवादः प्रकाशनं च इति चिन्तनं तु अयुक्तम् । अनुवादप्रकाशनयोः अनन्तरम् एव क्रेतॄणां पठितॄणां च निर्माणं भवति । क्रेतृपठितॄणां सङ्ख्यावर्धनेन अनुवादः प्रकाशनं च समृद्धिं गच्छतः । अतः सर्वमपि परस्परं पूरकम् । प्रकृतं तु सम्भाषणान्दोलनकारणतः पिपठिषवः देशे विदेशे च बहवः सन्ति ।

प्रकाशितानां पुस्तकानां विक्रयणं यथा स्यात् तथा कर्तुं केचन उपायाः चिन्तनीयाः ।

यथा - १) स्थाने स्थाने संस्कृतपुस्तकमेलायाः आयोजनम् ।
२) प्रतिप्रान्तं संस्कृतपुस्तकापणः ।
३) उपायनदानसमये संस्कृतपुस्तकदानस्य प्रोत्साहनम् ।
४) शुभकर्मसु अपरकर्मसु च यत्र वस्त्र-हिरण्य-धान्य-पात्र-धनादि-दानानि क्रियन्ते, तत्र संस्कृतग्रन्थदानमपि योजनीयम् ।

कार्यद्वयं तावत् सर्वेण अपि संस्कृतज्ञेन, सर्वेण अपि शिक्षक-प्राध्यापक-आचार्य-प्राचार्यैः करणीयम् ।

१) स्वस्य मासिकवेतने एकप्रतिशतं धनं संस्कृतपुस्तकानां क्रयणाय विनियोक्तव्यम् । एतेन स्वस्य संस्कृतऋणस्य पूर्तिः अपि भवेत् ।
२) स्वस्य विद्यालये महाविद्यालये वा विद्यमानेन ग्रन्थालयेन एतानि संस्कृतपुस्तकानि क्रीतानि यथा स्युः तथा स्वेन प्रयत्नः विधेयः ।

एतत् कार्यद्वयं कुर्मः चेत् वयं संस्कृतज्ञाः समग्रे देशे, स्वप्रयत्नेन एव, सर्वकारीयानुदानेन विना एव, प्रतिवर्षं दशसहस्राधिकसंस्कृतपुस्तकानां (प्रतिपुस्तकं सहस्रं प्रतिकृतयः इव) प्रकाशनं कारयितुं शक्नुयाम ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्र अन्यः अपि कश्चन महत्त्वभूतः अंशः अस्ति । संस्कृतेन अनुवादसमये

सा संस्कृतभाषा सरला स्यात्, सरलतमा स्यात्, यथा सम्भाषणसन्देशस्य भाषा । यदि भाषा प्रौढा भवेत् तर्हि कोऽपि न पठिष्यति, यतः तादृश्यः कृतयः इदानीमेव सन्ति । इतरासु अपि भाषासु दृश्यताम् - आधुनिकसाहित्यं सर्वमपि व्यवहारभाषा यथा यावती च सरला तथा तावत्या सरलया च भाषया भवति । तत्र लेखकस्य भाषापाण्डित्यस्य प्रदर्शनं न भवति । भाषायाः उद्देशः विचारसंवाहनम् । यदि प्रौढभाषाकारणतः उद्दिष्टं न सेत्स्यति तर्हि किं प्रयोजनम् ? वस्तुतः अद्य पाण्डित्यस्य निकषः तावत् सरलमनोहर-शैल्या लेखनम् एव । सरलतायाः विषये अस्माकं यावती आस्था स्यात् ततोऽपि अधिका आस्था भवेत् भाषाशुद्धतायाः विषये, संस्कृतत्वविषये च । पाणिनिसम्मताः एव प्रयोगाः भवेयुः, संस्कृतशैली एव आदर्तव्या स्यात् ।

एषा अनुवाद-प्रकाशन-वाचन-योजना देशे सर्वेषां संस्कृतज्ञानां संस्कृत-च्छात्राणां च भाषाज्ञानस्तरं भाषाप्रयोगस्तरं च वर्धयेत् । एतया प्राचीनाः सुन्दराः संस्कृताः प्रयोगाः पुनः व्यवहारपथम् आगच्छेयुः । सर्वभारतीय-भाषासाहित्यकृतीनां संस्कृतानुवादेन, तासां च देशे सर्वैः पठनेन च राष्ट्रियभावैक्यं सुदृढतरं भवेत् । संस्कृतक्षेत्रे नवचैतन्यं समुत्पद्येत । पुनरपि संस्कृतज्ञाः प्रज्ञालोके सारस्वतलोके च विहरेयुः । संस्कृतवाङ्मयस्य नवाध्यायस्य प्रारम्भः भवेत् । न केवलं संस्कृतस्य, अपि तु समाजशास्त्र-वाणिज्यशास्त्र-इतिहास-गणित-विज्ञान-सङ्गणकादीनां सर्वेषां विषयाणां संस्कृतेन पाठनस्य कालः समागच्छेत् ।

आगम्यताम् ! कालस्य स्पर्धाह्वानं स्वीक्रियताम् !!
अनूद्यताम् !!! प्रकाश्यताम् !!!! क्रीयताम् !!!!!
पठ्यताम् !!!!!! प्रचार्यताम् !!!!!!!

□□

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१०

संस्कृतभारतीकार्यं भवतः स्थाने अस्ति किम् ?

अद्यः अहं किञ्चन नगरं गतवान् आसम् । सहजतया तदा तत्रत्यानाम् उपदशसंस्कृतज्ञानां घण्टात्मकं मेलनम् अपि आसीत् । सम्भाषणसमये ज्ञातं यत् तेषु अधिकांशाः स्वस्य स्वस्य विद्यालये संस्कृतपाठनेन सह संस्कृतसम्बन्धे स्पर्धाः, सरलसंस्कृतपरीक्षा, संस्कृतदिवसः इत्यादीन् कार्यक्रमान् विद्यालयस्तरे सञ्चालयन्ति इति । एवं सर्वः अपि संस्कृतज्ञः वैयक्तिकरूपेण बहु उत्तमः एव । परं प्रश्नः भवति - ते दश जनाः मिलित्वा नगरे समाजमध्ये संस्कृताय किं कुर्वन्ति इति । स्वतन्त्रभारते समाजे शिक्षायां राष्ट्रजीवने वा संस्कृतेन योग्यं स्थानं न प्राप्तं चेत् तत्र किञ्चन महत्त्वभूतं कारणं नाम संस्कृतज्ञानाम् अस्माकं सामूहिकसक्रियतायाः अभावः । नगरस्तरे, जनपदस्तरे, राज्यस्तरे, अखिलभारतस्तरे च अस्माकं सामूहिकसक्रियतायाः काचित् प्रक्रिया स्यात्, काचित् पद्धतिः स्यात् च । सा क्रियाशीलता प्रतिस्थानं, प्रतिस्तरं च आनेतव्या । तदर्थं किञ्चन माध्यमं संस्कृतभारती ।

संस्कृतस्य भाषारूपेण शास्त्ररूपेण, वाङ्मयरूपेण वा संरक्षणं संवर्धनं चेति एतत् उभयमपि प्रत्येकस्मिन् नगरे तत्रत्यानां संस्कृतज्ञानां सामूहिकसक्रियताम् अवलम्ब्य. तिष्ठति । सामाजिकेषु विद्यमानां संस्कृतविषयिणीं श्रद्धां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

सज्जागरय्य सर्वेषां संस्कृतशिक्षणकार्यं संस्कृतज्ञैः अस्माभिः एव करणीयं भविष्यति । तदर्थं संस्कृतज्ञानाम् अस्माकं सामूहिकसक्रियता स्यात् । गृहे, गृहमार्गे, विद्यालये, समाजे, जनानां मध्ये चापि कार्यं करणीयं, गणरूपेण, गणभावेन च कार्यं करणीयम् इत्येतत् अत्यन्तम् अनिवार्यम् । गणः नास्ति चेत् गणनिर्माणं करणीयम् । संस्कृतप्रचारकार्यं न सर्वकारस्य, न वा समाजस्य, अपि तु संस्कृतज्ञानाम् अस्माकम् । अतः अस्माकं सामूहिकसक्रियता अनिवार्या । यदि वयं तथा कार्यं न कुर्याम तर्हि इतिहासः अस्मान् न क्षाम्येत् । स्वकर्तव्यपालनम् अकृत्वा पापभाजः अपि भवेम ।

यदि स्वस्य नगरे संस्कृतस्य संरक्षणं कुर्याम तर्हि देशे संस्कृतस्य संरक्षणं भवेत् । अतः कार्यं देशस्तरे न, स्थानीयस्तरे । संस्कृताय धर्मयुद्धं यद् करणीयम् अस्ति तत् प्रतिस्थानं, प्रतिनगरं, प्रतिग्रामं च करणीयं भविष्यति । संस्कृतराष्ट्रभवनस्य इष्टिका प्रतिस्थानं प्रतिष्ठापनीया भविष्यति । अतः संस्कृतसंरक्षणस्थानं भवतः नगरं, ग्रामः वा । संस्कृतसंरक्षणस्य प्रचारस्य च भगवत्कार्यस्य कर्ता भवान्, भवती, अहं च । यदि वयं सक्रियाः तर्हि संस्कृतं गतिशीलं भविष्यति । यदि वयं जीवामः तर्हि संस्कृतं जीविष्यति । अतः अद्य अपेक्षितम् अस्माकं संस्कृतज्ञानां सामूहिकजीवनम् । अस्माकं सामूहिकगतिविधयः एव संस्कृतस्य प्राणवायुसञ्चारमूलाः । 'जीवेम शरदः शतम्' 'वयं राष्ट्रे जागृयाम' इत्यादिरूपेण अस्मच्छब्दबहुवचनमेव प्रयुक्तम् ऋषिभिः । 'जीवेयम्' इति स्वार्थमात्रचिन्तनं नैव आसीत् । अतः अद्यापि वयं मिलित्वा सम्भूय कार्यं कुर्वन्तः संस्कृतोन्नतिं साधयेम ।

'दशभिर्मिलितैः किं यत् जगतीह न साध्यते' इति उक्तेः अनुसारं दश जनाः मिलिताः सन्तः यत्किमपि साधयितुं शक्नुयुः । यदि न सम्मिलेयुः तर्हि यत्किमपि न भवेदपि । पूर्वोक्ते नगरे तस्मिन् एव घण्टात्मके मेलने अन्यदपि किञ्चन चिन्तनं प्रवृत्तम् । तासु काचित् युवतिः सम्भाषणशिबिरचालने प्रशिक्षिता । 'शिबिरस्य व्यवस्था कृता चेत् भवती कतिषु शिबिरेषु पाठयितुं शक्नोति ?' इति पृष्टे सा – 'प्रतिमासं शिबिरमेकं चालयिष्यामि' इति उक्तवती । पश्चात् इतरे पृष्टाः यत् भवन्तः स्वस्य स्वस्य निवासक्षेत्रे गृहं परितः जनान् आहूय सम्भाषणशिबिरमेकं व्यवस्थापयितु किं शक्नुयुः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति । प्रत्येकं संस्कृतज्ञः 'आम्' इति अवदत् । द्वादशसु मासेषु द्वादशानां सम्भाषणशिबिराणां योजना तत्र पञ्चनिमेषाभ्यन्तरे जाता । सम्भूय चिन्तनस्य चमत्कारः एषः । परं सः चमत्कारः तदा एव पूर्णतां गच्छेत् यदा तेन एव प्रकारेण ते सर्वे प्रतिमासम् उपवेशनं कृत्वा सहचिन्तनं सहकार्यं च कुर्युः । किञ्चं एतादृशेन नियतेन उपवेशनेन एव सङ्घटननिर्माणं भवति ।

संस्कृतस्य विकासं सम्पादयितुं संस्कृतज्ञानां देशव्यापि सङ्घटनम् आवश्यकम् इति सर्वे अङ्गीकुर्वन्ति । तत् सङ्घटनं नासीत् इति कारणतः संविधाने संस्कृतेन आलङ्कारिकं स्थानमात्रं प्राप्तम् । तत् सङ्घटनबलं नासीदिति कारणतः १९६८ तमे वर्षे त्रिभाषासूत्रात् संस्कृतं निष्कासितम् अभवत् । तद् सङ्घटनबलं नास्ति इति कारणतः अद्यापि प्रतिस्थानं संस्कृतं बलिरूपेण अर्प्यते, वयं मूकप्रेक्षकाः स्मः । किमेतत् अस्माकं पुंस्त्वजागरायै नालम् ?

अन्येन प्रकारेण दृश्यताम् – सङ्घटनं निर्मीयमाणम् अस्ति इत्यनेन किं किं जायमानम् अस्तीति । समाप्तिं गच्छत् एतत् शैक्षिकवर्षं वयं संस्कृतसम्भाषण-शिबिरवर्षम् इति आचरितवन्तः । वर्षेऽस्मिन् साधितस्य केवलस्य एकस्य कार्यक्रमस्य परिणामं निवेदयामि । शिबिरवर्षे देशे –

१. चालितानि सम्भाषणशिबिराणि आहत्य – १०,७५२ (विद्यालयेषु – ५,८०६, महाविद्यालयेषु – १,४०३, समाजे – २८८३, उपेक्षितक्षेत्रे – ६६०)
२. शिक्षार्थिसंख्या – २,८५,६०४ (छात्राः १,७६,८०९, युवानः ५८,९२४, ज्येष्ठाः – ४९,८७१)
३. शिबिरस्थानानि – ३८१० (नगराणि – २०७३, ग्रामाः – १७३७)
४. लब्धाः कार्यकर्तारः – ३१४८
५. स्थानीयशिबिरचालकाः (विस्तारकपूर्णकालिकान् विहाय) – ३०८३
६. अनुवर्तिशिक्षणस्य प्रयत्नस्थानानि – १०६५
७. विक्रीतपुस्तकधनराशिः – रू. १८,०५,२३५ (दीक्षापुस्तकानि, Pride of India च विहाय)

पूर्ववर्षाणाम् अपेक्षया गतवर्षस्य कार्यस्य वृद्धेः प्रमाणं ३५०% अधिकम् अस्ति । एतस्य यशसः रहस्यम् अस्ति – सङ्घटनम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अतः अस्माभिः सर्वैः अपि अग्रिमेषु केषुचित् वर्षेषु सङ्घटननिर्माणविषये एव अवधातव्यम् । तच्च सङ्घटनं मिलित्वा गणरूपेण कार्यकरणे अस्ति, कार्यकर्तॄणां परस्परस्नेहबन्धे अस्ति च । अहम् एकः पृथक् भूत्वा स्वतन्त्रतया कार्यं करोमि इति नैव चिन्तनीयम् । सर्वैः सह मिलित्वा कार्यं करोमि इत्येव सङ्कल्पनीयम् । 'अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम् । अयोग्यः पुरुषो नास्ति योजकस्तत्र दुर्लभः' इति सुभाषितं जानन् भवान् एव किमर्थं संस्कृतभारत्याः कश्चन योजकः न भवेत् ? देशव्यापिनः, संस्कृतभारती–सङ्घटनस्य मूलाधारः भवतः स्थाने विद्यमानः कार्यकर्तृगणः । तस्य कार्यकर्तृ–गणस्य मूलाधारः अहम् एव इति चिन्तयित्वा आत्मानं सङ्घटननिर्माणकार्ये व्यापारयतु भवान् । एतस्मिन् विषये अधिकं ज्ञातुं 'संस्कृतभारती' इति पुस्तकं भवान् पठतु ।

यदा एकाकी सन् भवान् चिन्तयति तदा भयं, निरुत्साहः, संशयः इत्यादिभिः प्रभावितः भवितुम् अर्हति । यदा त्रिभिः चतुर्भिः वा सह मिलित्वा चिन्त्येत तदा धैर्यम्, उत्साहः निश्चयः च अवश्यंभावी । 'कोच्'नामकाः रेलयानस्य शकटाः भवन्ति । परं तेषाम् अग्रे (पृष्ठतः वा) 'इञ्जिन्'नामकम् अपि भवेत् । तदा एव तद् गच्छेत्, अथवा गमनसमर्थं यानं भवेत् । एवमेव संस्कृतज्ञैः यदि कार्यकर्तृभिः भवितव्यं, संस्कृतकार्येण यदि गतिशीलेन भवितव्यं, संस्कृतरेलयानेन यदि अग्रे गन्तव्यं, तर्हि कार्यकर्तॄणां 'मासिकनियतोपवेशन'नामकं यन्त्रं योजनीयम् । तदर्थं भवानेव अस्माकं योजकः ।

भवतः स्थाने संस्कृतकार्यस्य, तन्नाम संस्कृतभारतीकार्यस्य, प्रारम्भः नाम किम् ? भवान् भवदीयपरिचितैः कैश्चित् संस्कृतज्ञैः, संस्कृतच्छात्रैः संस्कृतानुरागिभिः वा सह नियतस्य उपवेशनस्य प्रारम्भं कुर्यात् । प्रतिमासं निश्चिते दिने निश्चिते समये निश्चिते स्थाने उपवेशनं, कार्यचिन्तनं च भवेत् । पूर्वमासे कृतस्य कार्यस्य अवलोकनम्, अग्रिमे मासे मासेषु वा करणीयस्य कार्यस्य योजना, सर्वेभ्यः कार्यकर्तृभ्यः कार्यवितरणं च इति एषः एव उपवेशनविषयः, कार्यविशेषः च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किञ्चन स्थानं (नगरं, ग्रामः वा) संस्कृतभारत्याः कार्यस्थानम् इति यदि

संस्कृताय भवान् कृपया अधोनिर्दिष्टेषु पञ्चविंशत्यां कार्येषु कानिचन पञ्च करोतु

१. 'वदतु संस्कृतम्' इत्यस्य पुस्तकस्य पञ्च प्रतिकृतीः क्रीत्वा पञ्चभ्यः जनेभ्यः ददातु ।
२. 'पत्राचारद्वारा संस्कृतशिक्षणम्' इति योजनायां पञ्च शिक्षार्थिनः योजयतु ।
३. सम्भाषणसन्देशपत्रिकायाः पञ्च ग्राहकान् सङ्गृह्णातु ।
४. पञ्चभ्यः जनेभ्यः संस्कृतभारत्यै धनसहयोगराशिं सङ्गृह्य ददातु ।
५. संस्कृतभारत्याः पञ्च पुस्तकानि क्रेतुं पञ्च जनान् प्रेरयतु ।
६. पञ्चसु स्थानेषु सम्भाषणशिबिराणाम् आयोजने साहाय्यं करोतु ।
७. वर्षे पञ्च दिनानि संस्कृतप्रचारकार्याय ददातु ।
८. पञ्चविधानि प्रचारपत्रकाणि मुद्राप्य ददातु ।
९. पञ्च संश्लेषकान् कारयित्वा मुद्राप्य च ददातु ।
१०. पञ्च संस्कृतशुभाशयपत्राणि कारयित्वा/मुद्रयित्वा ददातु ।
११. पञ्चसु विद्यालयेषु संस्कृतच्छात्रेभ्यः दानाय पञ्च पुरस्कारान् ददातु ।
१२. Pride of India इत्यस्य पुस्तकस्य पञ्च प्रतिकृतीः क्रीणातु विक्रीणतां वा ।

परिगणनीयं तर्हि तत्र संस्कृतभारत्याः नाम्ना -

१. कार्यकर्तॄणां गणस्य प्रतिमासं (न्यूनातिन्यूनं) नियतम् उपवेशनं भवेत् ।
२. भाषाशिक्षणात्मकः कश्चन कार्यक्रमः (सम्भाषणशिबिरादिः) भवेत् ।
३. द्वित्राः प्रचारात्मकाः कार्यक्रमाः अपि भवेयुः ।

एषा न्यूनतमा अपेक्षा । भाषणेन अलं, कार्यं प्रारभ्यताम् । अद्यैव । सेवितसंस्कृतलवणानाम् अस्माकं संस्कृतसेवाकार्यम् आद्यं कर्तव्यम् । तदर्थम् अस्माभिः संस्कृतप्रचारकार्याय सङ्घटननिर्माणाय च समयः दातव्यः, धनम् अपि दातव्यम् इति दानद्वयं धर्मबुध्या कर्तव्यम् । यथाशक्ति दानं न, शक्तिम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१३. पञ्चसु मन्दिरेषु संस्कृतभारत्याः प्रचारफलकानि स्थापयतु ।
१४. पञ्चानां प्रभाविप्रतिष्ठितजनानां कृते संस्कृतभारत्याः परिचयं कारयतु ।
१५. प्रचारार्थं पञ्च वस्त्रफलकानि कारयित्वा ददातु ।
१६. पञ्चानां विद्यालयानां ग्रन्थालयेभ्यः संस्कृतभारत्याः पुस्तकानां गुच्छान् ददातु ।
१७. प्रतिदिनं पञ्च रूप्यकाणि संस्कृतप्रचारकार्याय दानरूपेण दानपात्रे स्थापयतु ।
१८. प्रतिदिनं पञ्चभिः जनैः सह किञ्चित् किञ्चित् संस्कृतसम्भाषणं करोतु ।
१९. पञ्च जनान् संस्कृतं पाठयतु ।
२०. प्रतिसप्ताहं पञ्च नूतनजनान् दूरभाषया सम्पर्क्य संस्कृतभारतीं परिचाययतु ।
२१. संस्कृतकार्ये सहयोगाय पञ्च संस्थाः प्रेरयतु ।
२२. संस्कृतकार्यविषये पञ्च लेखनानि लिखतु ।
२३. पञ्चभ्यः जनेभ्यः संस्कृतविषये पत्राणि लिखतु ।
२४. पञ्चसु स्थानेषु संस्कृतविषये, संस्कृतभारत्याः विषये च भाषणं करोतु ।
२५. उपायनदानसमये पञ्चसु प्रसङ्गेषु संस्कृतपुस्तकानि ददातु ।

अतिरिच्य दातव्यम् ।

प्रतिसप्ताहं, प्रतिमासं (प्रतिवर्षं वा) संस्कृतकार्याय स्वधनव्ययेन धनदानेन च द्रव्ययज्ञः अस्माभिः अनुष्ठेयः । सङ्घटनस्य अनुशासनानुसारं कार्यपद्धत्यनुसारं च कार्यं कुर्वद्भिः, आत्मपरिष्कारं कुर्वद्भिः च योगयज्ञः अनुष्ठेयः । स्वयं संस्कृतभाषां शास्त्रं च पठद्भिः पाठयद्भिः च अस्माभिः ज्ञानयज्ञः अनुष्ठेयः । धन-स्थान-मान-पद-कीर्ति-प्रशस्ति-पुरस्कारप्राप्त्यादीन् स्वार्थान् संस्कृतयज्ञे दग्ध्वा तपः आचरणीयम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यदि भवतः स्थाने इदानीमेव संस्कृतभारत्याः कार्यं प्रचलति तर्हि तैः

सर्वैः सह भवान् अपि सम्मिलतु । कार्यं न प्रचलति चेत् प्रचालने निमित्तं भवतु । भगवतः सेवायाम् उत्तमम् उपकरणं भवतु । ततोऽप्यधिकस्य सौभाग्यस्य विषयः अन्यः कः स्यात् ?

पूर्वतने पृष्ठे पञ्चविंशतेः कार्याणां सूची दत्ता । सा सूची तु अपूर्णा, दिग्दर्शिकामात्रं च । तेषु कार्येषु भवान् किं किं कर्तुं शक्नोति इति चिन्तयतु, एतादृशानि अन्यानि अपि लघूनि कार्याणि चिन्तयतु, एकैकस्य कार्यस्य प्रारम्भं करोतु । किञ्च भवतः परिचिताः, मित्राणि, बान्धवाः, शिष्याः, भवता उपकृताः जनाः, वृत्तिसम्बद्धाः, प्रातिवेशिकाः इत्येवंप्रकारेण शताधिकैः सहस्राधिकैः वा जनैः सह भवतः घनिष्ठः सम्बन्धः भवति । तेषु एकैकस्य द्वारा पूर्वनिर्दिष्टेषु पञ्चविंशत्यां कार्येषु किं किं कार्यं कारयितुं शक्येत इति चिन्तयतु । अस्माभिः स्वयं तु कार्यं करणीयम् एव । तदर्थम् एव वयं जाताः, तदर्थम् एव वयं संस्कृतज्ञाः अभवाम, तदर्थम् एव भगवान् अस्मान् संस्कृतभारत्या योजितवान्, सम्भाषणसन्देशस्य ग्राहकं कृतवान् च । प्रश्नः सः न । प्रश्नः तु वयम् इतरेषां द्वारा अपि, पुत्रपुत्रीणां द्वारा अपि, अस्मत्परिचितानां द्वारा अपि कियतीं संस्कृतसेवां कारयेम इति । न केवलं स्वेन संस्कृताय जीवनीयं, स्वस्य मित्रपुत्रबान्धवादिभिः अपि संस्कृताय एव जीवनीयम् इति प्रयतनीयम् । म्रियते चेदपि संस्कृताय एव मर्तव्यम् । सामान्यरूपेण मृत्वा देहदाहनापेक्षया जीवतः देहस्य कणं कणम् अपि संस्कृतोज्जीवनध्येयाग्नौ दाहयामः चेत् एतद्देहधारणस्य सार्थक्यं स्यात् ।

भवतः स्थाने संस्कृतभारतीकार्यप्रारम्भाय, कार्यवर्धनाय च, तत्रत्यस्य कार्यकर्तुः, प्रान्तीयकार्यकर्तुः, एतस्य लेखकस्य वा सम्पर्कः क्रियताम् । सहस्रयोजनदूरस्य मार्गस्य क्रमणं प्रथमयोजनस्य क्रमणेन प्रारभ्यते । प्रथम-योजनदूरस्य क्रमणस्य आरम्भः प्रथमपदस्य पुरतः स्थापनेन भवति । तत् प्रथमं पदम् अद्यैव निक्षिपेम । स्वीयैः मित्रैः सह संस्कृतकार्यचिन्तनस्य प्रारम्भं कुर्याम । अद्यतनं दिनं भवतः/भवत्याः जीवने नूतनस्य अध्यायस्य प्रथमं पृष्ठम् अपि भवितुम् अर्हति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

□□

११.

'क्लासिकल् लांग्वेज्' लाभः उत हानिः ?

नवदशक्रिस्तशताब्द्याः अन्तिमे भागे तदानीन्तने मद्रासनगरे स्वामी विवेकानन्दः उक्तवान् आसीत् - ''आर्याणाम् आक्रमणस्य सिद्धान्तः ब्रिटिशैः सृष्टं किञ्चन महत् असत्यम्'' इति । तस्य कथनस्य शतस्य वर्षाणाम् अनन्तरं British Broadcasting Corporation (BBC) द्वारा स्वस्य जालपुटे इदम्प्रथमतया तद् असत्यम् अङ्गीकृतम् अस्ति । किञ्च केन प्रकारेण असत्येतिहासः लिखितः, भारतीयानाम् उपरि सः आरोपितः च अस्ति, तेन भारतस्य कियत् अन्याय्यं जातम् इति विवरणम् अपि कृतम् अस्ति । सत्यस्य बहिः आगमनाय शतं वर्षाणि आवश्यकानि अभवन् । किन्तु तावता कीदृशी हानिः जाता इति चिन्त्यताम् । आ सार्धैकशतवर्षेभ्यः (अद्य अपि !) सर्वः अपि भारतीयः 'आर्यः कश्चन विदेशाद् आगतः जातिविशेषः, द्रविडाः आर्येभ्यः भिन्नाः' इति शिक्ष्यमाणः अस्ति । भारतस्य जनमानसाद् तद् असत्यं परिमार्ष्टुं कियन्ति दशकानि आवश्यकानि भवेयुः इति न ज्ञायते । किञ्च, एतादृशानि इतोऽपि बहूनि असत्यबीजानि भारतमानसे उप्तानि सन्ति ।

यदा आङ्ग्लभाषा भारते व्यवहारपथम् आगता ततः आरभ्य संस्कृतस्य Classical language इति विशेषणं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

योज्यमानं वर्तते । Classical इत्यस्य शब्दस्य अर्थः कः ? The Concise Oxford Dictionary of Current English - 1990 Edition मध्ये Classical इति शब्दस्य भाषायाः सम्बन्धे अयम् अर्थः दत्तः अस्ति -

a) of ancient Greek or Latin literature or art
b) (of language) having the form used by the ancient standard authors (Classical Latin, Classical Hebrew)
c) based on the study of ancient Greek and Latin (a classical education)
d) learned in classical education.

Longman Dictionary of Contemporary English (1984) भाषासम्बन्धे एतम् अर्थं सूचयति - "being in accordance with ancient Greek or Roman models in literature or art or with later systems and standards based on them, simple but good, influenced by CLASSICISM. (Classicism means style of the literature of ancient Greece or Rome).

ग्रीक्, लेटिन् च मृते भाषे । संस्कृतम् अपि तथा एव इति प्रतिष्ठापयितुं ब्रिटिशानां प्रयत्नाः तु आसन् एव, अतः ग्रीक्लेटिन्भाषाभ्यां सह संस्कृतस्य तोलनं कुर्वन्ति स्म, तेन ते यद्यपि संस्कृतं मारयितुं न शक्तवन्तः तथापि मृतमिति आङ्ग्लशिक्षायुक्तान् भारतीयान् विश्वासयितुं तु समर्थाः अभवन् । १८३८तमे वर्षे लार्ड् मेकालेमहाशयः, १८४८ तमे वर्षे मेक्समुल्लरमहाशयः च संस्कृतभाषायाः Classical इति शब्दप्रयोगं कृतवन्तौ । ततः आरभ्य आङ्ग्लशिक्षणयुक्ताः सर्वे, B.A., M.A., Ph.D. इति धारायां शिक्षिताः संस्कृतज्ञाः च संस्कृतं Classical इत्येव अवगतवन्तः । (परं पारम्परिकधारायाः विद्वांसः Classical इति न उक्तवन्तः इति अपि अस्माभिः अवगन्तव्यम् ।)

भारतस्य स्वातन्त्र्यात् पूर्वं ब्रिटिशशिक्षणव्यवस्थायां संस्कृतं Classical languagesमध्ये एव आसीत् । स्वातन्त्र्यस्य अनन्तरम् अपि केन्द्रीयमाध्यमिक-शिक्षणे विश्वविद्यालयीयशिक्षणे अपि संस्कृतं Classical इत्यस्मिन् एव वर्गे आसीत् । 'संस्कृतायोगः' (Sanskrit Commission) यः भारतसर्वकारेण

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रचितः आसीत्, यस्य सदस्येषु बहवः प्रख्याताः संस्कृतज्ञाः अपि आसन्, १९५७ तमे वर्षे समर्पितायां तस्य आयोगस्य संस्तुतौ अपि संस्कृतं Classical language इत्येव उल्लिखितम् आसीत् । न केवलं तावत्, Sanskrit is the elder sister of classical languages like Greek and Latin इत्यपि तत्र वर्णितम् अस्ति । संस्कृतस्य Classical language इति कथनस्य औचित्यं तदाप्रभृति प्रभाविरूपेण न खण्डितम् इति कारणतः अद्य अथवा श्वः सा शिरःपट्टिका कदाचित् शिक्षाक्षेत्रे संस्कृतस्य प्राणहारिणी गलपट्टिका भवेद् वा इति विभीषिका जायमाना अस्ति । कथम् इति अग्रे प्रस्तोष्यते ।

भारते अद्यावधि सर्वासाम् अपि विद्यालयीयशिक्षासम्बद्धानां समितीनां संस्तुतिषु संस्कृतं प्राचीनभाषावर्गे एव अस्ति । विश्वविद्यालयानुदानायोगेन अपि संस्कृतभाषा प्राचीनभाषाणां सूच्याम् योजितम् अस्ति । शिक्षाक्षेत्रे प्राचीनभाषाणां सूच्यां संस्कृतं, पालि, प्राकृतं, पर्षियन्, अरेबिक् चेति पञ्च भाषाः सन्ति (आसन् !) । 'तमिलभाषा प्राचीनभाषा इति घोषणीया' इति अशीत्यधिकवर्षेभ्यः तमिलनाडुजनानाम् अभियाचना आसीत् । अन्ते गतवर्षे १०.१०.२००४ दिनाङ्के भारतसर्वकारेण तथा घोषणा कृता । सा उद्घोषणा स्वागतार्हा, साधुः एव, तमिलभाषायै सः सम्मानः दातव्यः च । २७.१०.२००५ दिनाङ्कस्य केन्द्रीयमन्त्रिमण्डलस्य सभायां तमिलभाषया सह संस्कृतम् अपि प्राचीनभाषा इति प्रस्तावः पारितः । परन्तु पालि-प्राकृत-अरेबिक्-पर्षियन्भाषाभ्यः प्राचीनभाषापदं न कल्पितम् । वर्षाद् आरभ्य (यस्मिन् दिने तमिलभाषा प्राचीनभाषा इति घोषिता ततः आरभ्य) प्राचीनभाषा-पदप्राप्त्यर्थं तेलुगुकन्नडभाषयोः अभियानं प्रचलति । परन्तु उपर्युक्तायां मन्त्रिमण्डलसभायां कन्नडतेलुगुभाषाभ्यां यथा प्राचीनभाषासम्मानः न लभ्येत तथा नियमपरिवर्तनं कृतम् । (पूर्वतनः नियमः आसीत् एकसहस्राधिक-वर्षाणां प्राचीनता स्यात् इति । परन्तु परिष्कृतनियमानुसारं - १) १५००-२००० अधिकवर्षाणां प्राचीनता स्यात् । २) साहित्यं स्वीयं मूलभूतं स्यात्, न तु अन्यभाषासाहित्यमूलम् इति ।)

तत्र किमपि कारणं भवतु नाम, सः अस्माकं विषयः न । परन्तु -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१) प्राचीनभाषाणां सूच्यां पूर्वम् एव संस्कृते स्थिते अपि,

२) 'प्राचीनभाषा' इति उद्घोषणाय संस्कृतज्ञानाम् अभियाचनायाम् असत्याम् अपि,

३) पालि-प्राकृत-पर्षियन्-अरेबिक्-भाषाभ्यः तस्मिन् पदे अदत्ते सति,

४) इतरभाषाणाम् अभियाचनायां सत्याम् अपि

ताभ्यः अदीयमाने सति च संस्कृतं प्राचीनभाषा' इति उद्घोषणस्य (तद् अपि त्वरया) का आवश्यकता आसीत् ? प्रश्नाः तु बहवः उद्भवन्ति ।

प्राचीनभाषा इति उद्घोषणं भवेत् इति तत्तद्भाषाप्रेमिणाम् अनुरोधस्य पृष्ठभूमिः का ? मम भाषा प्राचीना, प्राचीनतरा, प्राचीनतमा इति कश्चन आत्मगौरवभावः एव तत्र मुख्यः । तमिलभाषा प्राचीना उत संस्कृतभाषा प्राचीना इति चर्चा आ शताधिकवर्षेभ्यः प्रचलति । तत् भेदबीजम् आर्यद्रविड-भेदमूलजं, ब्रिटिशानां 'विभज्यतां, प्रशास्यतां च' इत्येतस्याः नीतेः परिणामः च । समन्वयवादिनाम् अस्माकं दृष्टिः तु या काऽपि भाषा प्राचीनतमा भवतु, तेन सन्तोषः एव, मम भाषा प्राचीनतमा इत्यस्य प्रतिपादने समयव्ययम् अकृत्वा, मम भाषा सर्वजनलभ्या यथा स्यात् तथा व्यवस्थाकरणे अपेक्षितेषु प्रयत्नेषु समयव्ययीकरणं श्रेयसे भवेत् इति । अतः वयं विवादेषु न पतेम ।

अन्या अपि काचित् पृष्ठभूमिः अस्ति । या भाषा प्राचीनभाषा इति उद्घुष्टा भवति तस्याः भाषायाः विकासाय –

१) तस्याः भाषायाः द्वाभ्यां विद्वद्भ्यां प्रतिवर्षं द्वौ अन्ताराष्ट्रियौ पुरस्कारौ ।

२) एकस्य अतिविशिष्टशिक्षासंस्थानस्य स्थापनम् ।

३) केषुचित् विश्वविद्यालयेषु पीठानां स्थापनम्

इति केन्द्रसर्वकारेण निश्चितम् अस्ति । अतः अपि प्राचीनभाषापदप्राप्त्यर्थं कासाञ्चित् भाषाणां जनाः प्रयत्नशीलाः सन्ति । (संस्कृतक्षेत्रे काश्चन पुरस्कार-भाजः व्यक्तयः प्राचीनभाषाघोषणेन अवश्यमेव प्रमुदिताः स्युः इति तु अन्यः एव विषयः ।)

संस्कृतभाषा प्राचीनभाषा न इति वयं वदन्तः न स्मः । प्राचीनभाषा इति तु सत्यम् एव । इदानीं तस्याः पुनरुद्घोषणेन अग्रे किं किं सम्भाव्यते ? लाभाः के, हानयः च काः स्युः इत्येव प्रश्नः । संस्कृतभाषा आधुनिकभारतीय-भाषासु अन्यतमा इति उद्घोषणीयम् इति गतेभ्यः आ चतुर्भ्यः वर्षेभ्यः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतज्ञानाम् अभियाचना, आन्दोलनं च आसीत् । तदर्थं शिक्षामन्त्रालये बहुवारं गोष्ठ्यः अपि अभवन् । परन्तु सा मन्दध्वनेः अभियाचना अद्यपर्यन्तं स्वीकृता न अभवत् । परन्तु विपरीतम् एव किञ्चित् सञ्जातम् ! किमर्थम् ?

प्राचीनभाषाभ्यः करिष्यमाणेषु तथाकथितेषु त्रिषु विकासकार्येषु संस्कृत-लाभाय किं भवेत् ? संस्कृतदृष्ट्या तु समग्रे देशे -

१) पुरस्काराणाम् अभावः नास्ति ।

२) अतिविशिष्टशिक्षासंस्थानानि इदानीम् एव त्रीणि (तिरुपतौ एकं, देहल्यां द्वयं च) सन्ति, पुनः स्थापनं न भवेत् ।

३) १२० विश्वविद्यालयेषु सम्पूर्णाः संस्कृतविभागाः एव सन्ति ।

किं पुनः पीठेन ! परम् इतरभाषाणां दृष्ट्या तथा न । यथा तमिलभाषायाः दृष्ट्या तमिलनाडुतः बहिः देशे इतरराज्येषु उपरितनानां त्रयाणाम् अपि आवश्यकता अस्ति । एवं संस्कृतस्य प्राचीनभाषा इति पुनरुद्घोषणेन संस्कृतस्य न कोऽपि विशिष्टः लाभः । परन्तु समग्रे देशे २८.१०.२००५ दिनाङ्के ये वार्तापत्राणि पठितवन्तः ते सर्वे चिन्तितवन्तः यत् केन्द्रसर्वकारेण संस्कृताय महत् किमपि ऐश्वर्यं कल्पितम् इति (बहवः अभिनन्दनाय दूरभाषाः अपि कृतवन्तः !) । हन्त ! भारतस्य दौर्भाग्यम् !

यथा केषुचित् वार्तापत्रेषु 'संस्कृतस्य प्राचीनभाषा इति घोषणेन केन्द्र-सर्वकारेण इतोऽप्यधिकः धनव्ययः करिष्यते' इति प्रकाशितं तथा अधिकः धनव्ययः दूरे एव तिष्ठतु नाम, प्रकृतं संस्कृताय दीयमानम् अनुदानम् अपि कदाचित् न्यूनं भवेत् । यतः केन्द्रसर्वकारस्य शिक्षामन्त्रालये भाषाविभागे Samskrit and Other Classical Languages इति कश्चन उपविभागः भवति । Other Classical languages इत्यस्य सङ्ख्या यथा यथा अधिका भवेत्, अन्यप्राचीनभाषाणां राजनैतिकशक्तिः यथा यथा अधिका भवेत् तथा तथा विद्यमाने धनराशौ संस्कृतस्य भागः न्यूनः, न्यूनतरः च भवेत् !

इतरभाषाणां दृष्ट्या प्राचीनभाषा इति नूतनकिरीटधारणेन तासां शोभा वर्धेत । परन्तु तादृशम् अलङ्करणं संस्कृतं न किञ्चिद् उपकरिष्यति, अपि तु कदाचित् अपकुर्यात् अपि । यथा सा ग्रीक्-लाटिन्-समाना निर्जीवा, प्राचीना, अतः अद्य अप्रासङ्गिकी, निरुपयोगिनी इति समाजे विद्यमानानां दृढमूल-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावनानाम् एव इतोऽपि पुष्टिं कुर्यात् अपि ।

यद्यपि केन्द्रीयसाहित्य-अकादमी, संस्कृतिमन्त्रालयस्य अन्तर्गता एव, तत्र अद्यावधि Modern Indian literary Languages इति साहित्यपुरस्कार-अनुवादप्रकाशनादीनां कृते स्वीकृतासु भाषासु संस्कृतम् अपि अस्ति, किञ्च तत्र प्राचीनभाषाः न स्वीकृताः तथापि संस्कृतिमन्त्रालयस्य अधीने ग्रन्थालयाः, पुरातत्त्वविभागः, पाण्डुलिपिमिशन्, कलाशिल्पवस्तुसङ्ग्रहालयाः इत्यादयः भवन्ति इति कारणतः संस्कृतिमन्त्रिद्वारा संस्कृतस्य प्राचीनभाषा इति पुनरुद्घोषणेन संस्कृतस्य पुरातनम् इति महत्त्वस्य एकस्यैव चित्रं वर्धते । एषा उत्तमा प्रगतिः इति वक्तुं न शक्यते ।

परं सर्वापेक्षया महत्त्वभूतः विषयः प्राचीनभाषा इति पुनरुद्घोषणेन शिक्षाक्षेत्रे भविष्यकाले संस्कृतस्य स्थानं किं भवेत् इति । कोठारी-आयोगस्य संस्तुतेः अनुगुणं १९६८ तमे वर्षे भारतसर्वकारेण लोकसभायां विधेः पारणं कृत्वा शिक्षानीतिः स्वीकृता । सा एव शिक्षानीतिः अद्य अपि अन्विता भवति । तस्यां नीतौ संस्कृताय उत्तमं स्थानं न कल्पितम् । उच्चप्राथमिके विभिन्नप्रकारेण आसीद् एव । १९६८ पर्यन्तं १) मातृभाषा २) राजभाषा ३) आधुनिकभाषा ४) प्राचीनभाषा ५) विदेशीयभाषा इति पञ्चसु यत्किमपि भाषात्रयं स्वीकर्तुम् अवसराः कल्प्यमानाः आसन् । (परं समये समये तत्र नीतौ परिवर्तनानि अपि भवन्ति स्म ।) किन्तु १६६८ शिक्षानीतौ यद्यपि संस्कृतस्य महिमा वर्णितः, सर्वेण संस्कृतं पठनीयम् इति वर्णितं, तथापि प्रत्यक्षतः पाठ्यचर्यायां संस्कृताय स्थानं न दत्तम्, त्रिभाषासूत्रे आधिकारिकरूपेण संस्कृतस्य स्थानं न कल्पितम् । तस्य त्रिभाषासूत्रस्य व्यावहारिकः सारांशः तु - १) मातृभाषा/ प्रादेशिकभाषा २) राजभाषा ३) प्रथमभाषाद्वितीयभाषारूपेण अपठिता काचित् आधुनिकभारतीयभाषा इति । अत्र प्राचीनभाषा न अन्तर्भवति । तर्हि कथम् इदानीं देशे अधिकांशराज्येषु संस्कृतं त्रिभाषासूत्रान्तर्गतरूपेण पाठ्यते ? प्राथमिकमाध्यमिकशिक्षा राज्यशासनाधीना । राज्यानि प्रकृतं तु संस्कृतम् इच्छन्ति, अतः संस्कृतं पाठ्यते । परं यदि पूर्वाग्रहपीडितः कश्चन शिक्षाधिकारी मुख्यभूते नीतिनिर्णायके पदे उपविशेत् तर्हि प्राचीनभाषाव्याजं प्रदर्श्य संस्कृतं निष्कासयेत् अपि । १९८८ तमे वर्षे केन्द्रीयमाध्यमिक-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिक्षाबोर्ड्(CBSE)द्वारा प्राचीनभाषाव्याजं प्रदर्श्य संस्कृतं निष्कासितम् । (तदा संस्कृतज्ञैः न्यायालयं गत्वा संस्कृतपरनिर्णयः प्राप्तः इति तु अन्यः विषयः ।) इदानीं कर्णाटके कन्नडभाषासंरक्षणसंवर्धननिमित्तं संस्थापितया बरगूरुरामचन्द्रप्पसमित्या (आन्दोलनम् अपि प्रचलति) संस्कृतं प्राचीनभाषा, अतः सा त्रिभाषासूत्रे न भवेत् इति वादः उपस्थाप्यमानः अस्ति । एवमेव अग्रे राज्ये राज्ये एतादृशानि आन्दोलनानि आरब्धानि चेत् ?

तमिलभाषा अपि प्राचीनभाषा इति घोषिता खलु, तर्हि किं तस्याः हानिः न भवेत् इति पृष्टे सति उत्तरम् एवम् अस्ति – तमिलभाषा मातृभाषारूपेण प्रादेशिक्भाषारूपेण च अस्ति, अतः सा प्रथमभाषारूपेण एव पाठ्यते, अतः तस्याः हानिः न भवति । परन्तु संस्कृतस्य तत् भाग्यं प्रकृतं तु नास्ति इति ।

यदा १९८७-८८ तमे वर्षे हिमाचलप्रदेशस्य सांसदेन प्रो॰ नारायणचन्द्र-

शास्त्रीयभाषा इति न, प्राचीनभाषा इत्येव साधु !

Classical language इत्यर्थे भारतीयभाषासु प्रयुज्यमानः शब्दः अपि असमीचीनः अस्ति । तस्मिन् अर्थे सर्वत्र 'शास्त्रीयभाषा' इति शब्दः प्रयुज्यते । प्रायः केनचित् असंस्कृतज्ञेन सः शब्दः प्रथमं प्रयुक्तः स्यात् । इतरासु भाषासु शिक्षादृष्ट्या तु भाषाशिक्षणं साहित्यशिक्षणम् चेति अंशद्वयम् एव । परं संस्कृते भाषा, साहित्यं, शास्त्रं चेति अंशत्रयम् अस्ति । शास्त्रपरम्परा संस्कृतस्यैव वैशिष्ट्यम् । शास्त्रीयभाषा इति कथनेन शास्त्राणां भाषा इति विशिष्टः अर्थः भवति, यश्च अर्थः Classical इत्यत्र अप्रासङ्गिकः । ग्रीक्, लाटिन् इत्यादीनां Classical इति कथने अंशद्वयम् अस्ति । एकः अंशः प्राचीनता इति, अपरः च शैली, रूपं चेति । इतरभाषाणां प्राचीनग्रन्थानाम् आधुनिकग्रन्थानां च भाषयोः भेदः, शैलीभेदः, रूपे भेदः च दृश्यते, न तु संस्कृते । संस्कृतभाषा सर्वत्र संस्कृता, समाना च । किञ्च, केवलं शास्त्राणि प्राचीनानि न, बह्व्यः साहित्यकृतयः विज्ञानेतिहासादिकृतयः चापि प्राचीनाः सन्ति । तस्मात् Classical इत्यर्थे संस्कृतभाषया, भारतीयभाषाभिः च क्रियमाणः शास्त्रीयभाषा इति शब्दप्रयोगः अनुचितः, प्राचीनभाषा इत्येव साधु ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पराशरेण संसदि (Ref.No.6329) संस्कृतभाषा प्राचीनभाषा उत आधुनिक-भारतीयभाषा इति प्रश्नः पृष्टः, तदा तदानीन्तनेन शिक्षाराज्यमन्त्रिणा श्री एल्.पि.शाहिमहाशयेन लिखितम् उत्तरं दत्तम् - 'प्राचीनतायाः दृष्ट्या सा प्राचीनभाषा, वर्तमानोपयोगितादृष्ट्या सा आधुनिकभाषा च' इति ।

संस्कृतभाषा प्राचीनभाषा अपि अस्ति इति अङ्गीकुर्वद्भिः अस्माभिः सा आधुनिकभारतीयभाषा इति अनुरोधः अपि क्रियते । किञ्च इदानीं संस्कृतस्य प्राचीनत्वतः अपि आधुनिकत्वं, वर्तमानत्वं च अधिकं महत्त्वभूतं भवति । तस्मात् संस्कृतभाषा आधुनिकभारतीयभाषा इत्यत्र अस्माकं तर्काः अधो-निर्दिष्टाः सन्ति -

१) केन्द्रीयसाहित्य-अकादमीद्वारा आधुनिकभारतीयभाषाणां ग्रन्थाः एव आद्रियन्ते, अनूद्यन्ते च, न तु प्राचीनभाषाणाम् । तत्र २२ भाषाः स्वीकृताः, यासु संस्कृतम् अस्ति ।

२) आकाशवाण्यां, दूरदर्शने च आधुनिकभाषाभिः एव वार्ताप्रसारः भवति, न तु प्राचीनभाषाभिः । संस्कृतेन प्रतिदिनम् उभयत्र अपि वार्ताः प्रसार्यन्ते ।

३) संविधानस्य अष्टमसूच्यां प्रशासनव्यवहारमाध्यमभाषारूपेण स्वीकृतासु २२ भाषासु संस्कृतमस्ति, प्राचीनभाषाः न सन्ति ।

४) संस्कृतस्यैव १३ विश्वविद्यालयाः सन्ति ।

५) ५००० संस्कृतपाठशालाः सन्ति ।

३) त्रिकोटिच्छात्राः विद्यालयेषु संस्कृतं पठन्ति ।

७) संस्कृतेन षष्ट्यधिकाः पत्रिकाः नियतं प्रकाश्यन्ते ।

८) ६० देशेषु २५० विश्वविद्यालयेषु संस्कृतपाठनं भवति ।

९) ज्ञानदर्शनं, दूरदर्शनं, डि डि इण्डिया इत्यादिसञ्चारमाध्यमानां द्वारा प्रतिदिनं संस्कृतकार्यक्रमाणां प्रसारः भवति ।

११) प्रतिवर्षं सहस्रशः आधुनिकानि साहित्यपुस्तकानि संस्कृतेन प्रकाश्यन्ते ।

---

*इदानीं (२००९) १५ विश्वविद्यालयाः सन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१२) लक्षशः जनाः दैनन्दिनजीवने संस्कृतेन व्यवहरन्ति ।
१३) २००१ तमस्य वर्षस्य जनगणनातः ज्ञायते यत् भारते ४८,८०० जनानां मातृभाषा संस्कृतम् अस्ति इति ।
१४) छात्रसङ्ख्यादृष्ट्या भारते संस्कृतस्य एव तृतीयं स्थानम् । (आङ्ग्ल-हिन्दीभाषयोः क्रमेण प्रथमद्वितीयस्थाने ।)
१५) अष्टानां प्रादेशिकभाषाणां माध्यमेन संस्कृतशिक्षणस्य पत्राचार-पाठ्यक्रमाः सन्ति ।
१६) सहस्राधिकेषु महाविद्यालयेषु संस्कृतस्य स्नातककक्ष्याः द्विशताधिकेषु महाविद्यालयेषु स्नातकोत्तरकक्ष्याः च प्रचलन्ति ।
१७) संस्कृत-अकादमी इत्याख्याः परिषदः सप्तसु राज्येषु सन्ति ।
१८) विश्वे शताधिकेषु वैज्ञानिकशोधसंस्थानेषु संस्कृतविज्ञानसम्बन्धे शोधकार्याणि प्रचलन्ति ।
१९) सङ्गणकस्य कृते उपयोक्तुम् अर्हा सहजभाषा संस्कृतभाषा इति वैज्ञानिकैः कथ्यते ।
२०) आधुनिकशब्दानां कृते वैज्ञानिकप्रशासनिकपारिभाषिकशब्दानां कृते च तत्समशब्दाः संस्कृताद् एव स्वीकरणीयाः इति संविधानस्य निर्देशः अस्ति ।

संस्कृतभाषा आधुनिकभारतीयभाषा अपि अस्ति इति केन्द्रसर्वकारेण उद्घोषणा करणीया इति तु एकः विषयः, तदर्थं देहल्याम् अस्मदीयाः प्रयत्नशीलाः सन्ति एव । ततोऽपि मुख्यभूतः विषयः नाम वर्तमानसमये संस्कृतसेवकैः अस्माभिः किं किं करणीयम् इति । तानि एवं सन्ति -

१) Classical Language इत्यस्य योग्यं संस्कृतपदं प्राचीनभाषा इति, अतः तस्य एव पदस्य प्रयोगः करणीयः इति सर्वेषु संस्कृतज्ञेषु निवेदनं करणीयम् ।
२) संस्कृतभाषायाः हितसम्बन्धे तु तस्याः प्राचीनभाषा इति चित्रम् अद्यत्वे अधिकं न उपकुर्यात्, अतः 'आधुनिकभाषा' इति चित्रस्य प्रचाराय प्रयत्नः करणीयः ।
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
३) प्रथमं सर्वेषु संस्कृतज्ञेषु प्राचीनभाषा-आधुनिकभाषाविषये जागरणं भवेत्,

तदर्थं संस्कृतज्ञानां मध्ये एतद्विषये चर्चा करणीया ।

४) संस्कृतभाषायाः आधुनिकभारतीयभाषा इति पदस्य अन्वर्थतासम्पादनाय अस्माभिः अस्माकं परस्परव्यवहारे, पाठनव्यवहारे, कक्ष्याकक्षव्यवहारे, शिक्षकप्राध्यापकप्रकोष्ठव्यवहारे, विद्यालयव्यवहारे, गृहव्यवहारे, पत्रव्यवहारे, सभासम्मेलनसङ्गोष्ठीव्यवहारेषु, सर्वलेखनव्यवहारेषु सर्ववाग्व्यवहारेषु च संस्कृतभाषा आनेतव्या । यदा अस्माभिः सर्वैः संस्कृतप्रेम्णा सदा सर्वत्र च संस्कृतव्यवहारः क्रियेत तदा सहजतया लोकाः एव संस्कृतम् आधुनिकभाषा, वर्तमानभाषा इति वदेयुः, अस्माकं कथनस्य आवश्यकता न भवेत् । तदा एव सा 'भाषा' भवेत् ! भाषिता, भाष्यमाणा वा भाषा भवति खलु !

अस्माभिः अस्माकं कृत्या एव अस्मांकं विचारः प्रतिष्ठापनीयः । संस्कृतस्य वर्तमानत्वस्य दृग्गोचरतासम्पादनाय अस्माभिः समाजमध्ये संस्कृतसम्बन्धिनः नानाविधाः कार्यक्रमाः करणीयाः । कार्यक्रमाः करणीयाः चेत् अस्मासु एकैकेन अपि समयः दातव्यः, सर्वैः सह सम्भूय कार्यं करणीयं च । संस्कृतज्ञैः अस्माभिः सङ्घटितैः भूत्वा योजनाबद्धरूपेण कार्यं क्रियते चेद् एव वर्तमानसमये आगतं सङ्कटं निवारयितुं शक्यम् ।

प्राचीनभाषा इति उद्घुष्टम् इति एषः प्रसङ्गः सामान्यः इति मा चिन्त्यताम् । तत्र अस्मदुपरि पात्यमानः महादण्डः दृश्यताम् । दूरात् अस्मद्दिशि समागच्छन् वेगवान् झञ्झावातः दृश्यताम् । भावी अपायः अवगम्यताम् । यदि वयम् अद्य सक्रियाः, गतिशीलाः, परिहारोन्मुखाः, संस्कृतसेवातत्पराः, संस्कृतभारती-पोषकाः च भवेम तर्हि श्वः 'काव्यशास्त्रविनोदेन' कालं यापयितुं शक्नुयाम । यदि अद्य वयं साहसकार्याणि कुर्याम, कष्टशतं सहेमहि तर्हि श्वः वयं बालान् कथाः वक्तुं शक्नुयाम । यदि अद्य वयं परिश्रमं कुर्याम, समयाभावे अपि संस्कृतकार्याय समयं कल्पयेम, क्लेशपरम्पराणां स्वागतं कुर्याम तर्हि श्वः संस्कृतं विकसितं, प्रसृतं, विराजमानं च द्रष्टुं शक्नुयाम ।

स्वेदेन विना सुखं कुतः ? समर्पणेन विना सिद्धिः कुतः ? त्यागेन विना अमृतत्वं कुतः ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

असङ्घटितानां शक्तिहीनानां जनबलरहितानां संस्कृतज्ञानाम् अभियाचनां

केऽपि न सम्मानयेयुः । प्रजातन्त्रम् इदम् । प्रजाः एव जागरयितव्याः, शिक्षयितव्याः च । अस्माभिः प्रजानां समीपे गन्तव्यम् । तदर्थं श्रमः कर्तव्यः ।

गृहकार्यं, महाविद्यालय/विद्यालयकार्यं चेति अस्माकं कार्यद्वयम् एव न । तृतीयम् अपि भवेत् - संस्कृतप्रचारकार्यम् इति । तृतीयाय संस्कृतकार्याय भवतः मम च समयः धनं चेति उभयमपि अर्पणीयम् ।

प्राचीनभाषा इति उद्घोषणम् इदम् अपायघण्टायाः वादनम् इति मन्यताम् । संस्कृतद्वेषिभिः संस्कृतस्य प्रहाराय, संस्कृतस्य निष्कासनाय, निर्मूलनाय च बह्व्यः कूटनीतयः क्रियमाणाः सन्ति, यासां पत्रोल्लेखः न उचितः । परिस्थितिम् अवगत्य वयं संस्कृतज्ञाः दीर्घाय युद्धाय, प्रदीर्घाय सङ्घर्षाय च सन्नद्धाः स्याम ।

अस्माकं संस्कृतसम्बन्धिन्यः आकाङ्क्षाः कार्यकारिण्यः भवेयुः । तदर्थं कार्यारम्भः करणीयः ।

अविरततपः संस्कृतक्षेत्रे अविरतं भवेत् । अजितं मनः संस्कृतज्ञस्य अदम्यं भवेत् । अक्षुण्णोत्साहः संस्कृतशिक्षकस्य अपरिमितः भवेत् ।

जीवेम शरदः शतम् । जीवेम विपदः शतम् । तरेम सरितः शतम् । सम्मुखीकरवाम तडितः शतम् । जयेम जगतः शतम् । □□

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१२.

सावधानाः स्याम

गतस्य शैक्षिकवर्षस्य प्रारम्भे (जून् - २००५ तमे वर्षे) उत्तराञ्चलसर्वकारेण माध्यमिककक्ष्यासु (9,10) उच्चमाध्यमिककक्ष्यासु (11,12) केन्द्रीयमाध्यमिकशिक्षापरिषदः (CBSE) पाठ्यक्रमस्य अनुसरणम् उद्घुष्टम् । ततः पूर्वं तत्र उत्तराञ्चले नवमदशमयोः अपि त्रिभाषासूत्रम् आसीत्, यस्य अन्तर्गतत्वेन संस्कृतम् अपि पाठ्यते स्म, ९५% छात्राः संस्कृतं पठन्ति स्म च । परं CBSE पाठ्यक्रमानुसारं नवमदशमयोः द्विभाषासूत्रम् एव । यद्यपि तस्मिन् ऐच्छिके भाषाद्वये संस्कृतम् अपि भवितुम् अर्हति, परम् आङ्ग्लभाषां हिन्दीं च परित्यज्य (द्वयोः अन्यतरां भाषां परित्यज्य) संस्कृतस्य स्वीकर्तारः ५% छात्राः एव । पूर्वतनं ९५% क्व इदानीन्तनं ५% च क्व ? तथापि एतेन संस्कृतस्य हानिः भविष्यति, अस्माभिः न्यायालयः गन्तुं शक्यते इति तस्मिन् समये तत्रत्यैः संस्कृतबन्धुभिः न अवगतम् ।

परं मासद्वयानन्तरं यदा विद्यालयेषु संस्कृतावधीनां न्यूनताकारणतः संस्कृतशिक्षकपदानि समापयिष्यन्ते इति सर्वकारेण उद्घुष्टं तदा सर्वे संस्कृतशिक्षकाः जागरिताः अभवन्, राज्ये सर्वत्र कोलाहलं कृतवन्तः, यस्य परिणामतः सर्वकारेण पदानि न समाप्तिं गमिष्यन्ति इति आश्वासनं कृतम् । सर्वे सन्तुष्टाः शान्ताः च । शिक्षणे संस्कृतं समाप्तं भविष्यति खलु ? तदर्थं के प्रक्षुब्धाः ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गते डिसेम्बरमासे (२००५) कालिकातानगरे वङ्गराज्यस्य मन्त्रिमण्डलस्य गोष्ठी प्रचलति स्म । (वार्ता - www. the statesman. net) उच्चशिक्षामन्त्री श्री सत्यसाधनचक्रवर्ती अर्थसङ्कल्पनायां (Budget) स्वस्य मन्त्रालयाय अधिकं धनं प्रदातव्यम् इति प्रतिपादयन् नूतनतया प्रारप्स्यमाणानां महाविद्यालयानाम् उल्लेखं कृतवान्, येषु महाविद्यालयेषु त्रिषु संस्कृतादिपारम्परिकविषयाणाम् अपि पाठनं भविष्यति इति उक्तवान् । 'संस्कृतम्' इति शब्दश्रवणमात्रेण मुख्यमन्त्री अर्थमन्त्री च क्रोधमूर्च्छितौ एव जातौ !

मुख्यमन्त्री शिक्षामन्त्रिणं भर्त्सितवान् - "भवान् वैज्ञानिकचिन्तनं विना कस्मिन् प्राचीने संस्कृतकाले जीवन् अस्ति ?" इति ।

पश्चात् विंशतिनिमेषपर्यन्तं वाक्कलहः जातः । वृत्तिपरकक्ष्याः चालनीयाः इति वित्तमन्त्रिणः कथनस्य उत्तरं वदन् शिक्षामन्त्री उक्तवान् - "इञ्जनियरिङ्ग्, वोकेशनल् कोर्सेस् वा पठितवन्तः वृत्तिरहिताः बहवः सन्ति, परं संस्कृतं पठितवन्तः वृत्तिं प्राप्नुवन्तः सन्ति" इति ।

अन्ते मुख्यमन्त्री गर्जितवान् - 'मन्त्रिमण्डलस्य पुनारचनासमये भवान् मन्त्रिपदं न प्राप्स्यति ।'

गुजराते श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतेः नियुक्तिः जाता । श्री पङ्कजजानिमहोदयः, पूर्वम् आङ्ग्लभाषाप्राध्यापकः आसीत्, पश्चात् प्राचार्यः, शिक्षामन्त्रालये सहनिदेशकः च आसीत् । तदा संस्कृतशिक्षाविभागः तस्य अधीनः एव आसीत्, अतः संस्कृतस्य प्राशासनिकः सम्बन्धः तस्य अस्त्येव । संस्कृतप्रेमी च । व्यक्तिरूपेण तस्य विषये अस्माकम् आक्षेपः नास्ति, वयम् अभिनन्दामहे च, कार्येषु सहकारं च करिष्यामः । परम् अत्र विचारणीयाः अन्ये च केचन अंशाः सन्ति । कस्यचन संस्कृतविश्वविद्यालयस्य कुलपतिनियुक्तिप्रसङ्गे संस्कृतेतरविषयज्ञस्य नियुक्तिः एषा तृतीया ।

पूर्वं केरलस्य श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयस्य कुलपतिनियुक्तिः द्विवारम् एवमेव अभवत् । यदि गुजराते संस्कृतज्ञः एव कुलपतिः अभविष्यत् तर्हि संस्कृतज्ञानां मनोबलं वर्धिष्णु अभविष्यत् । अत्र राजनीतिज्ञाः यावद् कारणीभूताः तावदेव (नो चेदपि स्वल्पमात्रेण) संस्कृतजगत् अपि कारणीभूतम् अस्ति । ऐक्यं, समग्रचिन्तनं, दूरगामियोजना, युवनेतृत्ववर्धनम् इत्यादिषु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अंशेषु अस्माकम् इतःपरम् अवधानम् अपेक्षितम् ।

केषाञ्चित् विश्वविद्यालयानां, संस्कृतशिक्षापरिषदां च प्राशासनिक-अधिकारिणां, कार्यालयीयजनानां च नियुक्तिप्रसङ्गेषु अस्माभिः निष्फलः प्रयत्नः कृतः आसीत् यत् तत्र संस्कृतज्ञाः एव भवेयुः इति, तदर्थं कारणम् उक्तम् आसीत् यत् इतरेषां कृते जगति यथेष्टम् अवसराः सन्ति, परं संस्कृतज्ञानां कृते संस्कृतसम्बन्धिसंस्थाः विना अन्यत्र अवसराः न भवन्ति, ताः एव न स्वीकुर्वन्ति चेत् अन्ये पुनः कथं स्वीकुर्युः इति । परं तदा तत्र सम्बद्धाः जनाः यद् अवदन् तत्र कश्चन चिन्तनीयः अंशः अस्ति ।

तैः उक्तम् - 'संस्कृतपरिषदि कश्चन असंस्कृतज्ञः अस्ति चेदेव सः संस्कृतज्ञानां परस्परकलहेभ्यः पृथक् स्थित्वा निष्पक्षनिर्णयान् कर्तुं शक्नुयात्' इति । वयं तेन विचारेण सह सम्मताः इत्यर्थः न, परन्तु अत्रापि कश्चन पाठः अस्ति यदि पठेम तर्हि ।

CBSEद्वारा संस्कृतभाषाशिक्षणे सम्प्रेषणविधिः आनीतः आसीत्, 'मणिका' इति पाठ्यपुस्तकसरणिः प्रकाशिता, देशे सर्वत्र शिक्षकाणां कार्यशालाः अपि आयोजिताः आसन् च । तेन संस्कृतशिक्षणे गुणवत्ता वर्धमाना आसीत्, छात्रसंख्या वर्धमाना आसीत्, छात्राणाम् उत्साहः अपि वर्धमानः आसीत् । परं श्रूयते तत्र किञ्चन परिवर्तनं सम्भाव्यते इति । CBSE इत्यनेन NCERT द्वारा निर्मितानां पुस्तकानाम् एव प्रयोगः करणीयः इत्यस्ति कश्चन प्राशासनिकः विषयः । केषुचित् विषयेषु CBSE द्वारा तस्य अनुसरणं न क्रियते स्म । अनुसर्तव्यम् इति इदानीं कश्चन निर्णयः जातः इति श्रूयते । NCERT पुस्तकानि अपि पूर्वापेक्षया बहु एव समीचीनतराणि जातानि । परं सर्वेषु एका एव प्रार्थना यत् सम्प्रेषणविधेः अपि परित्यागः मास्तु इति ।

उत्कलराज्ये माध्यमिकोच्चमाध्यमिककक्ष्यासु त्रिभाषासूत्रानुसारं १०० अङ्कानां संस्कृतपठनावसरः अद्यावधि अस्ति, ९५% छात्राः संस्कृतम् एव पठन्ति च । परम् इदानीं शिक्षामन्त्री इच्छति ५० अङ्कानां कृषिविज्ञानम् अपि पाठनीयम्, अतः संस्कृतस्य कृते ५० अङ्काः पर्याप्ताः इति, तदर्थम् आदेशः अपि दीयमानः अस्ति च इति । कस्यचित् विषयस्य अङ्काः कर्तनीयाः,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कस्य ? 'अश्वं नैव गजं नैव... ।''

एतादृशाः बहवः चिन्ताजनकाः प्रसङ्गाः तदा तदा जायमानाः भवन्ति । अस्माभिः सावधानैः भूत्वा समये यद् करणीयं तद् करणीयं, किञ्च तत्तत्प्रसङ्गतः पाठाः पठनीयाः । प्रत्येकं काठिन्यम् अवसररूपेण परिवर्तनीयम् । अग्नौ प्रज्वालितं सुवर्णम् इव प्रत्येकस्मिन् प्रसङ्गे कष्टतप्ताः वयं बलवत्तराः भवेम । समागतया विपदा अस्मदीयः आत्मविश्वासः संवर्धेत । हतोत्साहाः नैव स्याम । निराशतावातावरणे सुखदवार्ताः अपि निदाघे शीतपवन इव आयान्ति ।

इदमिदानीं देहल्यां 'प्रगति मैदान्' इत्यत्र सप्तदशः विश्वपुस्तकमेलः सम्पन्नः । तत्सम्बन्धे इण्टरनेट्मध्ये काचित् वार्ता आसीत् ।

तस्यां वार्तायां मध्ये एकं वाक्यम् आसीत् - ''मेले संस्कृतस्य, संस्कृतसम्बद्धानां च पुस्तकानाम् उत्तमं विक्रयणं प्रचलति स्म'' इति ।

तां वार्तां मह्यं प्रेषयता केनचित् मित्रेण लिखितम् आसीत् - ''प्रायः एतद् अस्माकं बहूनां वर्षाणां परिश्रमस्य फलं स्यात्'' इति ।

स्यादपि । परन्तु ततोऽपि मुख्यः विषयः नाम अवश्यंभाविनः कालस्य सङ्केतरेखा एषा इति ।

NCERT द्वारा इदानीं नूतनतया प्रकाशिते National Curriculum Framework - 2005 इत्यस्मिन् त्रिभाषासूत्रवर्णनावसरे यद्यपि संस्कृतं प्राचीनभाषा (अभिजातभाषा) इत्येव वर्णिता Latin, Arabic, Persian भाषाभिः सह योजिता च, तथापि Sanskrit may also be studied as a Modern Indian Language (MIL) in addition to these Languages इत्यपि लिखितम् । एतत्तु तत्र समितौ विद्यमानानां संस्कृतज्ञानां काचित् उपलब्धिः एव ।

International Journal of Neuroscience इति पत्रिकायां डा० ट्रेविस्महाशयेन Sanskrit & Brain Function इति विषये कश्चन शोधप्रबन्धः लिखितः अस्ति । (http:// www. mum.edu/the Review/01-02/2-06-02. html # 1_Dr) सः डा० ट्रेविस्महाशयः EEG (Electro Encephalo Gram, यथा हृदयस्य ECG परीक्षणम् इति कथ्यते, मस्तिष्कस्य परीक्षणं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

EEG इति कथ्यते, तेन मस्तिष्कतरङ्गाणां परीक्षणं भवति ।) heart and breath rate तथा च skin conductance इति अंशानां मापनं कृतवान् । (Spanish, French, German इत्यादीनाम् आधुनिकभाषाणां श्रवणसमये पठनसमये च यत् EEG Power and coherence तथा च skin conductance Level भवति, तस्मात् संस्कृतस्य (अर्थावगमनं विना अपि !) श्रवणसमये पठनसमये च तानि गणनीयप्रमाणेन भिन्नानि सन्ति, संस्कृत-श्रवणसमये अन्यासाम् आधुनिकभाषाणाम् अपेक्षया skin conductance न्यूना अभवत् तथा च EEG Power & coherence अधिकम् अभवत् इति एषा काचन अत्यन्तमहत्त्वपूर्णा अस्माकम् उत्साहवर्धिका वार्ता ।

गोवाराज्ये कस्मिंश्चित् तान्त्रिकमहाविद्यालये व्याख्याता अस्ति श्रीशेखर-नार्वेकरः । तस्य कश्चन लेखः सम्भाषणसन्देशपत्रिकायाः भाद्रपद(सप्टम्बर्-२००५)मासस्य अङ्के 'चापयन्त्रम्' इति शीर्षकेण प्रकाशितः आसीत् । तेन 'सिद्धान्तशिरोमणिः' इति ग्रन्थे वर्णितस्य जलचक्रयन्त्रस्य तत्त्वस्य आधारेण निर्मिता घटी, तत्सम्बद्धः शोधप्रबन्धः च सद्यः गुवहाटीनगरे IIT Guwahati द्वारा समायोजिते Machines and Mechanisms इति विषयस्य द्वादशे राष्ट्रियसम्मेलने सर्वेषां वैज्ञानिकानाम् अवधानाकर्षकः स्तुतिपात्रं च अभवत् । किञ्च सः शेखरनार्वेकरमहोदयः फ्रान्स्, जापान् इत्यादिषु देशेषु अपि इदानीम् आहूतः अस्ति । संस्कृतमाता बहूनां शेखरनार्वेकराणां प्रतीक्षायाम् अस्ति । किमर्थं वयम् अपि पुरोगाः न भवेम ?

ये धनव्ययं न कुर्वन्ति तेषां समीपे एव धनसङ्ग्रहः भवति । अतः धनवन्तः धनदानं धनव्ययं वा न कुर्वन्ति । निष्क्रियनिरुपयोगिजनानां समीपे एव समयः भवति । अतः समयवन्तः कदापि किमपि न साधयिष्यन्ति । अतः समयाभाव-वान् परं समर्पणभाववान् निर्धनसक्रियसंस्कृतज्ञः निश्चयेन एव अद्भुतम् असाध्यम् इति भासमानम् अपि महत् कार्यं साधयेत् ।

धीमान् संस्कृतज्ञः यदा ध्येयवान्, धैर्यवान् च भवेत् तदा एव संस्कृतसमाजः शक्तिमान् भवेत्, भारतदेशः कीर्तिमान् भवेत् च ।

केचन भाषणं कुर्वन्ति, केचन आचरणं कुर्वन्ति ।
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
केचन उपदेशशीलाः, केचन परिश्रमशीलाः ।

केचन बाह्यसाहाय्ययाचकाः, केचन आन्तरिकसामर्थ्यवर्धकाः ।
केचन समस्याकथयितारः, केचन परिहाराविष्कर्तारः ।
केचन प्रश्नकर्तारः, केचन उत्तरदातारः ।
एतेषु अहं क्व इति सर्वः अपि चिन्तयेत् ।

□□

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१३.

भाषाशिक्षणम् उत विषयशिक्षणम् ?

संस्कृतभाषायाः प्रचारः भवेत् इति सर्वः अपि संस्कृतज्ञः इच्छति, तद्विषये भाषणम् अपि करोति च । विचारः, उच्चारः, आचारः, प्रचारः इति एतेन क्रमेण एव कस्यचिद् अपि विषयस्य प्रचारः भवति । विचारस्य उच्चारः केवलः न पर्याप्तः, तस्य विचारस्य आचारः अपि अपेक्षितः । अतः भाषायाः प्रचाराय भाषायाः प्रयोगस्य 'आचारः' आवश्यकः । सः च आचारः गृहे, विद्यालये, कार्यालये, समाजे च प्रत्येकं संस्कृतज्ञेन करणीयः । तेन भाषाप्रचारः सेत्स्यति ।

दैनन्दिनव्यवहारे, लोकव्यवहारे च संस्कृतभाषायाः प्रयोगस्य अनुरोधमात्रं न पर्याप्तम् । विद्यालयानां, महाविद्यालयानां, संस्कृतपाठशालानां च संस्कृतकक्ष्यासु संस्कृतप्रचारः प्रथमम् आवश्यकः । विश्वविद्यालयानां संस्कृतविभागेषु संस्कृतव्यवहारस्य प्रारम्भे जाते तदनु अन्यत्र सर्वत्र सहजतया एव संस्कृतेन व्यवहारः प्रारभ्येत ।

सामान्यविश्वविद्यालयानां केषाञ्चित् संस्कृतप्राध्यापकानां, सामान्यमहाविद्यालयानां संस्कृतप्राध्यापकानां च कथनं नाम ''भाषाशिक्षणं, विषयशिक्षणं चेति अंशद्वयम् अस्ति । उच्चशिक्षणे विषयशिक्षणस्य एव प्राधान्यम् । तस्मात्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

, तत्र संस्कृतशिक्षणस्य माध्यमभाषा या कापि भवतु नाम, तत्र संस्कृतभाषामाध्यमं भवेत् इति अनुरोधः नैव उचितः । वर्तमान-

परिस्थितौ तु संस्कृतभाषायां संस्कृतवाङ्मये वा विद्यमानानां शास्त्रीयाणां गहनविचाराणां शिक्षणं केवलं शक्यम् । संस्कृतमाध्यमेन पाठनं परीक्षालेखनं च अव्यावहारिकम्'' इति ।

अव्यावहारिकमित्यस्य विषये कथ्यमानाः तर्काः -

१) छात्राणां भाषासामर्थ्यं नास्ति

२) छात्राः भीताः सन्तः पलायनं कुर्युः

३) विद्यमानं यत्किञ्चित् संस्कृतम् अपि नश्येत्

इत्येते त्रयः मुख्यभूताः । वयम् अपि एतेभ्यः त्रिभ्यः कारणेभ्यः एव, एतासां तिसृणां समस्यानां निवारणाय एव, तन्नाम -

१) छात्राणां भाषासामर्थ्यवर्धनाय,

२) छात्रभयनिवारणाय (छात्राकर्षणाय)

३) न्यूनातिन्यूनं विद्यमानस्य वा संस्कृतस्य रक्षणाय - 'संस्कृतेन पाठनं, संस्कृताय जीवनम्' इति आघोषणं कुर्वन्तः स्मः ।

इदानीं प्रधानप्रश्नः यः अस्ति भाषाशिक्षणम् उत विषयशिक्षणम् इति, तत्र अस्माकम् आशयः एवम् अस्ति - एतदुभयं भिन्नं भिन्नं न, उभौ अपि अंशौ अविभाज्यौ । भाषाशिक्षणं विना विषयशिक्षणं न शक्यम् । विषयशिक्षणं विना भाषाशिक्षणं नैव सम्भवेत् । किञ्चन एकं प्रधानम्, अपरं किञ्चन अप्रधानम् इत्यपि न भवेत् । उभे अपि शिक्षणे युगपत् भवेताम् । यथा वागर्थौ । तस्मात् तस्य प्रश्नस्य योग्यम् उत्तरं भवति 'भाषया विषयस्य शिक्षणम्' इति । तन्नाम संस्कृतेन संस्कृतविषयशिक्षणम् इति ।

संस्कृतस्य संस्कृतमाध्यमेन पाठनं च्छात्राणां कष्टाय भवेत् इति ये केऽपि वदन्ति तेषां तत् कथनं केवलं कल्पनामात्रं, प्रयोगाधारितं न । परं संस्कृतपाठने संस्कृतमाध्यमं प्रभावितमं भवति इति एषः अनुभवसिद्धः प्रयोगजन्यः च विचारः ।

भारते, विश्वे वा, यत्र कुत्रापि किञ्चन एकं भाषाशिक्षणं दर्श्यतां यत्र स्नातक-स्नातकोत्तरकक्ष्यासु (शोधप्रबन्धेषु च) काचित् भाषा अन्यभाषा-माध्यमेन पाठ्येत, परीक्षायाम् अन्यभाषामाध्यमेन लिख्येत च । एकम् अपि उदाहरणं नास्ति । किमर्थं वयं संस्कृतज्ञाः सूर्यप्रकाशः इव स्फुटं दृश्यमानं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सत्यम् अङ्गीकर्तुं न सज्जाः ? किं वयं संस्कृतभाषां भाषा इत्येव न परिगणयामः ?

केचन वदन्ति यत् संस्कृतमाध्यमं भवतु, परं प्रथमं माध्यमिकस्तरे प्रारभ्यतां येन च्छात्राणां सामर्थ्यं भवेत्, पश्चात् च विश्वविद्यालये इति । माध्यमिकस्तरस्य अध्यापकाः वदन्ति यत् उच्चकक्ष्यासु संस्कृतमाध्यमे समागते सति एव तत्र शिक्षिताः पश्चात् अध्यापकाः भूत्वा माध्यमिकस्तरे संस्कृतेन पाठयितुं शक्नुयुः इति । एवं स्थिते परिहारः कः ? एकः एव मार्गः – उभयत्र अपि युगपत् आरब्धव्यम् इति । उभयत्र अपि छात्राणां कृते सेतुपाठ्यक्रमः आरब्धव्यः, अध्यापकप्राध्यापकानां च प्रशिक्षणं करणीयं, नूतनपाठ्यक्रमः, पाठ्य-पुस्तकानि, मूल्याङ्कनविधयः च चिन्तनीयाः ।

शरीरे कश्चन रोगः क्षतः वा जातः चेद् क्वचिद् चिकित्सासमये काचित् वेदना, केचन क्लेशाः च भवन्ति । परन्तु तेन कारणेन उपचारमेव न कुर्मः इति तु नास्ति ।

अर्वाचीने काले आयुर्वेदक्षेत्रे महती प्रगतिः न जाता । किमर्थम् ? एतदर्थं यत् संस्कृतभाषा परित्यक्ता इति । पञ्चाशति एव वर्षेषु इस्रेल्देशः विश्वे अग्रेसरेषु अन्यतमः जातः । तत्र अन्यतमं कारणं – तैः स्वभाषा हिब्रू उज्जीविता इति ।

अद्य देशे सर्वत्र संस्कृतज्ञाः अभिप्रयन्ति यत् संस्कृतज्ञानस्तरः (अध्यापकानां, छात्राणां, शिक्षणस्य च) ह्रासं गतः इति । तत्र किं कारणम् ? समाजे स्थानम्, उपजीविकाप्राप्तिः, सर्वकारनीतिः इत्यादीनि कारणानि सन्ति चेदपि तत्र प्रधानं कारणं तु पाठनविधिः । अवलोकयतु भवान्, यत्र विद्वांसः संस्कृतेन पाठयन्ति तत्र च्छात्राः अद्यापि अधिकांशाः योग्याः दृश्यन्ते । अहम् एतदपि न वदामि यत् संस्कृतेतरमाध्यमेन पठितवन्तः व्युत्पन्नाः न जाताः इति । परम् एतद् अवश्यम् अभविष्यत् यत् यदि ते संस्कृतेन अपठिष्यन् तर्हि इतोऽपि विद्वत्तराः अभविष्यन् इति ।

कस्मिंश्चिदपि क्षेत्रे परिवर्तनम् आनेतव्यं चेत् तदर्थं –

१) निश्चितं निर्दिष्टं च लक्ष्यम् आवश्यकम्

२) तदनुगुणं कार्यक्रमाः चिन्तनीयाः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३) सुचिन्तिता समयबद्धा च योजना आवश्यकी च ।

संस्कृतक्षेत्रे गुणात्मकं परिवर्तनम् आनेतुं स्तरवर्धनाय च कार्यक्रमाणां योजना का ? सर्वकारावलम्बनं विना, परावलम्बनं विना च एव संस्कृतज्ञानाम् अस्माकं योजना का ?

यस्मिन् कार्ये साधिते बहूनि फलानि सेत्स्यन्ति तादृशं परिणामकारकं कार्यं भवति संस्कृतस्य संस्कृतमाध्यमेन पाठनस्थितिप्राप्त्यर्थम् उपायचिन्तनम् इत्येतद् । तस्यां दिशि प्रयत्नेषु आरब्धेषु दशसु विंशत्यां वा वर्षेषु संस्कृतक्षेत्रे अद्भुता प्रगतिः भवेत् । प्रयत्नाभावे तावत्सु एव वर्षेषु वयं कदाचित् संस्कृतं शोधविषयत्वेन पश्येम अपि !

यथा सर्वेषां जनानां संस्कृतानुकूलमानसनिर्माणाय संस्कृतसम्भाषणं महत्तमं साधनं, कार्यकर्तृगणनिर्माणाय सङ्घटननिर्माणाय च सम्भाषणशिबिरं किञ्चिन प्रबलम् उपकरणं, तथा एव संस्कृतस्य शिक्षकाणां, छात्राणां, पाठ्यपुस्तकानां, पाठनविधेः, आहत्य संस्कृतशिक्षणस्यैव गुणस्तरवर्धनाय, च्छात्रसंख्यावर्धनाय च प्रकृष्टोपकारकं करणं 'भाषया विषयशिक्षणम्' इति कश्चन प्रयासः, भावि अभियानम् !

वयं तु अग्रे विज्ञान-गणित-इतिहासादीन् सर्वान् विषयान् अपि संस्कृतेन पाठयितुम् इच्छामः । (केचन एतादृशाः विद्यालयाः आरब्धाः सन्ति अपि ।) परं प्रकृतं न्यूनातिन्यूनं संस्कृतेन संस्कृतस्य पाठनं वा भवतु ।

प्रथमं संस्कृतभाषा विद्यालयभाषा भवेत्, तदनन्तरं संस्कृतज्ञानां गृहभाषा भवेत्, गृहभाषायां जातायां जनभाषा भवेत्, तावता देशभाषा भवेत्, तदनु विश्वभाषा भवेत् । 'संस्कृतं विश्वभाषा' इति भाषणेन अलम् । प्रथमं तां संस्कृतकक्ष्याभाषां कृत्वा, विद्यालयभाषां कृत्वा च प्रथमसोपानस्य आरोहणं कुर्याम ।

वयं कालाभिज्ञाः भवेम । इतरभाषाणां शिक्षणक्षेत्रे काः प्रगतयः जाताः, तत्र समकालिकविचाराः के इति अवगच्छेम । विश्वं कस्यां दिशि गच्छत् अस्ति, कियता वेगेन परिवर्तमानम् अस्ति च इति जानीयाम । देशकालयोः आवश्यकतानुसारं स्वपरिवर्तनसमर्थाः एव जीविष्यन्ति, अन्ये इतिहासविषयाः भविष्यन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तुषैः युक्ताः व्रीहयः एव बहुकालं स्थास्यन्ति, उप्ताः चेत् अङ्कुरतां यान्ति

च, न तु तुषैः विहीनाः तण्डुलाः । संस्कृताद् ऋते शास्त्रविचाराणां न रक्षणं भवेत्, न वा वर्धनम् । चषकेण विना दुग्धस्य नयनं यथा न शक्यं तथा संस्कृतेन विना विषयाणां प्रापणं दुःशकम् । तस्माद् भाषा न उपेक्षणीया ।

भवान् रोमन्लिपेः द्वारा (आङ्ग्ललिप्या) लिखितानां संस्कृतश्लोकानां पठने यथा क्लेशान् अनुभवति तथा तत्समानतया एव कश्चन संस्कृतभाषाकौशलविरहितः काव्याध्ययने, शास्त्राध्ययने वा पङ्गुताम् अनुभवति, सुष्ठु अवगन्तुं, मनसि उपस्थापयितुं च न शक्नोति ।

कश्चन आङ्ग्लभाषया उक्तं श्रुत्वा लिखितं पठित्वा च सम्पूर्णतया अवगन्तुं शक्नोति, परम् आङ्ग्लभाषया तादृशीम् अभिव्यक्तिं कर्तुं न शक्नोति इति अस्ति चेत् सः यथा आत्मविश्वासहीनः सन् बहुत्र कष्टानि अनुभवति तथा एव विषयज्ञः सन् अपि सः अस्वाधीनभाषः चेत् आहतविश्वासः अवरुद्धकण्ठः अभिव्यञ्जनाक्षमः च सन् कामपि पीडां, कामपि अपूर्णतां च अनुभवति । तस्मात् शते क्लेशेषु सत्सु अपि, दातव्यं बहु मूल्यं दत्त्वा अपि, भाषाशिक्षणं कृत्वा भाषया एव विषयपाठनं कर्तव्यम् । तेन भाविपरम्परा संस्कृतसारस्वतलोके स्वतन्त्रतया विहर्तुं शक्नुयात् ।

यद्यपि सर्वेषु स्तरेषु चतुर्णाम् अपि भाषाकौशलानां प्रयोगः भवेत् तथापि माध्यमिकस्तरे श्रवणभाषणयोः, उच्चशिक्षणस्तरे पठनलेखनयोः च प्रगतप्रशिक्षणं भवेत् । तस्मात् स्नातकस्नातकोत्तरकक्ष्यासु संस्कृतेन पठनस्य लेखनस्य च प्राधान्येन अभ्यासः कारणीयः । भाषणं लेखनं चेति अभिव्यक्तिकौशलद्वयं यैः छात्रैः स्वाधीनीक्रियते तैः तु पुनः विषयाः गभीरतया स्पष्टतया च अवगन्तुं शक्याः । ते पुनः स्वयमपि बहून् विषयान् सङ्ग्रहीतुं शक्नुयुः । तस्मात् संस्कृतेन लेखनं पाठनीयं, लेखनात् पूर्वं पठनं पाठनीयं, पठनात् पूर्वं भाषणं पाठनीयं, भाषणात् पूर्वं श्रवणं कारणीयम् ।

भवतः पुत्राय कार्यानं दत्तं चेद् न पर्याप्तम् । तं कार्यानचालनम् अपि पाठनीयं, नो चेत् तस्य निमित्तं प्रत्येकवारं भवता एव कार्यानचालनं करणीयं भवेत् ।

वयं शिक्षकाः अपि संस्कृतभाषाप्रयोगं न कुर्मः, छात्राः अपि न कुर्वन्ति इति स्थितिः अस्ति इत्यस्मात् कारणात् एव व्याकरणकक्ष्यायां 'तथायुक्तं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चानीप्सितम्' इति सूत्रपाठनावसरे पुस्तके दत्तं 'ग्रामं गच्छन् तृणं स्पृशति' इत्येतस्मात् उदाहरणात् ऋते वर्तमानकालिकं किञ्चित् उदाहरणान्तरं वयं न दद्मः, न वा छात्राः पृच्छन्ति ! अस्माकं छात्राः यदि वर्तमानपरिवेषेण सह संस्कृतं सम्बन्द्धुं शक्नुवन्ति तर्हि एव ते संस्कृतपठनस्य आनन्दम् अनुभवितुम् अर्हन्ति । अतः अपि अस्माभिः संस्कृतेन एव संस्कृतपाठः करणीयः ।

अनुवादविधिः द्विसहस्राधिकवर्षप्राचीना यूरोपीयपाठनपद्धतिः । हिन्दी हिन्दीमाध्यमेन, इङ्ग्लिष् इङ्ग्लिष्माध्यमेन, कन्नडं कन्नडमाध्यमेन च पाठ्यते । सर्वाः भाषाः तत्तद्भाषामाध्यमेन एव पाठ्यन्ते । संस्कृतस्य अपि तथैव भवेत् ।

इदानीं भारतभवने विद्युतः प्रधानपिञ्जः एव निवारितः अस्ति, अतः एव अन्यः कोऽपि पिञ्जः नुत्तः चेदपि दीपाः न ज्वलन्ति । संस्कृतेन संस्कृतम् इति प्रधानपिञ्जः नुद्यते चेत् राष्ट्रभवनस्य सर्वे संस्कृतदीपाः उज्ज्वलतया प्रकाशेरन्, भुवनत्रयं दीपयेयुः च ।

□□

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१४.

2001 वर्षस्य जनगणना, संस्कृतं च

भारतदेशे प्रतिदशवर्षं जनगणना प्रचलति । इतः पूर्वं २००१ तमे वर्षे सा जाता आसीत् । अग्रिमा जनगणना २०११ तमे वर्षे भविष्यति । गतायाः जनगणनायाः अनुसारं भारतस्य जनसंख्या १०२, ८६,१०,३२८ ।

जनगणनासमये जातिभाषाप्रदेश-उपासनादिविषयानुसारम् अपि जनगणना क्रियते । निर्दिष्टकालावधौ तदर्थं नियुक्ताः जनाः (प्रायः शिक्षकाः सर्वकारीयाः कर्मचारिणः च) गृहं गृहं गत्वा पृच्छां कृत्वा व्यक्तिविवरणं सङ्गृह्णन्ति । अथवा तथा करणीयम् इति नियमः । केचन तु स्वविद्यालये स्व-कार्यालये वा उपविश्य स्वमनसा एव पत्रकाणि पूरयन्ति इति तु अन्यः विषयः ।

२००१ तमस्य वर्षस्य जनगणनायाः अनुसारं संस्कृत-भाषिजनाः १४,१३५ सन्ति । तेषु पुरुषाः ८,१८९, महिलाः च ५,९४६ । भारतस्य आहत्य जनसंख्या या अस्ति तस्याम् अन्तर्गतानां भाषाणां (तया भाषया भाषितारः = मातृभाषाभाषिजनाः इत्यर्थः) प्रतिशतपरिमाणं यदि चिन्त्येत तर्हि हिन्दीभाषायाः प्रथमं स्थानं भवति (४१.०३% जनाः तया भाषन्ते) । बोडोभाषायाः भवति अन्तिमं स्थानम् । (०.१३% जनाः तया भाषन्ते) (दृश्यतां कोष्ठकम् -१)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतस्य लेखनं बोडोभाषायाः अनन्तरम् अस्ति । किञ्च प्रतिशत-परिमाणावल्याम् उल्लेखानर्हता तस्याः तत्र निर्दिष्टा । एतस्य तात्पर्यं यत् संस्कृतस्य अन्तिमं स्थानम् अपि नास्ति इति ! तावती स्वल्पीयसी जनसंख्या संस्कृतज्ञानाम् !!

अहं तु एतां सांख्यिकीं जालपुटात् स्वीकृतवान् । तत्र तु Speakers Strength इत्येव शब्दः प्रयुक्तः । अतः मया अपि 'बलम्' इति शब्दः प्रयुक्तः । जनतन्त्रे संख्याबलमेव वास्तविकं बलं खलु । (कोष्ठकम् - २ दृश्यताम्) १९७१ तमे वर्षे सा अस्माकं संख्या २२१२ आसीत् । पश्चात् १९८१ तमे वर्षे ६१०६ जाता । अनन्तरं १९९१ तमे वर्षे ४९,७३६ अभवत् । सा तु महती प्रगतिः । परन्तु २००१ तमे वर्षे सा १४,१३५ जाता । एषा महती न्यूनता तु चिन्तनीयः विषयः । गते अवसरे ०.०१% अङ्कान् प्राप्य प्रथमवारं प्रतिशतपरिमाणावल्यां किञ्चन स्थानं प्राप्तवन्तः

कोष्ठकसङ्ख्या - १

विविधभाषाभाषिसंख्यासूच्याम् अवरोहणक्रमेण अष्टमसूच्यन्तर्गतानां भाषाणां बलम् (२००१)

क्र.सं.	*भाषा*	*प्रतिशतम्*
१.	हिन्दी	४१.०३%
२.	बङ्ग	८.११%
३.	तेलुगु	७.१९%
४.	मराठी	६.९९%
५.	तमिळ	५.९१%
६.	उर्दू	५.०१%
.....	.....	.....
.....	.....	.....
१९.	डोग्री	०.२२%
२०.	मणिपुरी	०.१४%
२१.	बोडो	०.१३%
२२.	संस्कृतम्	N (Negligible)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कोष्ठकसङ्ख्या - ३ **संस्कृतभाषिणां राज्यशः संख्या**

क्र.सं.	राज्यम्	आहत्य संख्या	पुरुषाः	महिलाः
१.	जम्मूकश्मीर	१९	१७	२
२.	हिमाचलप्रदेश	२३६	१८०	५६
३.	पञ्जाब	१०८	६५	४३
४.	चण्डीगढ	२२	२१	१
५.	उत्तराञ्चल	४२०	२५५	१६५
६.	हरियाणा	२०४	१४८	५६
७.	दिल्ली	२८८	१९३	९५
८.	राजस्थान	९८९	५८७	४०२
९.	उत्तरप्रदेश	७,०४८	३,८५६	३,१९२
१०.	बिहार	७५४	४१३	३४१
११.	सिक्किम्	३	३	०
१२.	अरुणाचलप्रदेश	१	१	०
१३.	नागालाण्ड	५	५	०
१४.	मणिपुर	-	-	-
१५.	मिजोराम	६	६	०
१६.	त्रिपुरा	-	-	-
१७.	मेघालय	१	१	०
१८.	असम	५१	२९	२२
१९.	पश्चिमबङ्गाल	१३८	८१	५७
२०.	झारखण्ड	२१०	११८	९२
२१.	ओरिस्सा	१२८	७९	४९
२२.	छत्तीसगढ	१२८	६८	६०
२३.	मध्यप्रदेश	३८१	२१९	१६२
२४.	गुजरात	१४०	८५	५५
२५.	डामन-डियू	१०	१०	०
२६.	दादरा - नगर हावेली	-	-	-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२७. महाराष्ट्र	४०८	२४१	१६७
२८. आन्ध्रप्रदेश	१३४०	८८४	४५६
२९. कर्णाटक	८३०	४७६	३५४
३०. गोवा	४६	२४	२२
३१. लक्षद्वीप	-	-	-
३२. केरल	१६६	९०	७६
३३. तमिळनाडु	५०	३१	१९
३४. पाण्डिचेरी	-	-	-
३५. अण्डमान निकोबार	-	-	-
योगः	१४,१३५	८,१८९	५,९४६

आस्म, परम् एतदवसरे तदपि स्थानं नष्टम् । किमर्थम् ?

गतजनगणनायाः अनन्तरं देशस्य बहुभ्यः भागेभ्यः जनाः दूरभाषां कृत्वा मां सूचितवन्तः - 'मम मातृभाषा संस्कृतम् इति उक्ते सत्यपि जनगणनाकर्ता तद् न अङ्गीकरोति स्म, तथा न लिखति स्म' इति । केचन उक्तवन्तः यत् पत्रके 'संस्कृतम्' इति पर्यायः एव न दत्तः आसीत् इति । केचन तु कलहं कृत्वा लेखितवन्तः एव । आहत्य तात्पर्यम् एतदेव यत् जनगणना योग्यप्रकारेण न जाता इति । अन्यथा चतुर्थे कोष्ठके (कोष्ठकम्

कोष्ठकसङ्ख्या - २

अष्टमसूचीभाषाभिः* भाषमाणानां बलस्य तौलनिकी संख्या प्रतिशतमानं च

क्र.सं भाषा	संख्या			
२२. संस्कृतम्	१९७१ २२१२	१९८१ ६१०६	१९९१ ४९७३६	२००१ १४१३५
प्रतिशतम् (%)	N	N	०.०१%	N

* *संविधाने राजनीतिकव्यवहारार्थं २२ भाषाः परिगणिताः अष्टमसूच्यन्तर्गततया । ताः उच्यन्ते - 'अष्टमसूचीभाषाः' इति ।*

CC-0 Nepal Sanskrit Academy, Kathmandu Collection

कोष्ठकसङ्ख्या - ४ अष्टमसूचीभाषाणां प्रतिदशकं प्रतिशतवृद्धिः

क्र.सं.	भाषा	१९७१-८१	१९८१-९०	१९९१-२००१
२	बङ्गाली	१४.३२%	३५.६७%	१९.७९%
५	गुजराती	२७.८३%	२३.०२%	१३.३२%
७	कन्नड	१८.३६%	२७.४६%	१५.७९%
९	कोङ्कणी	४.०९%	१२.१३%	४१.३७%
१०	मैथिली	२२.७१%	३.२५%	५६.८१%
१२	मणिपुरी	१३.८६%	४०.९१%	१५.४७%
१६	पञ्जाबी	३९.००%	१९.२१%	२४.४८%
१७	संस्कृत	१७६.००%	७१४.५४%	- ७१.५८%
१९	सिंधी	२१.९२%	३.८४%	१९.४४%
२१	तेलुगु	१३.११%	३०.४१%	१२.१०%

- ४) यथा लिखितं तथा प्रतिदशवर्षं जनसख्यायां तादृशः भेदः कथं शक्यः ? दृश्यताम् - प्रथमे दशके बङ्गभाषिजनानां वृद्धिः १४.३२ %, द्वितीये दशके ३५.६७ %, तृतीये दशके १९.७९ % इति । मध्यस्थे दशके द्विगुणितवृद्धेः कारणं किम् ? दशसु एव वर्षेषु कोङ्कणीभाषाभाषिजनानां ४१.३७ % मिता वृद्धिः कथं भवेत् ? मैथिलीभाषाभाषिजनानां संख्यायाः वृद्धिः दशवर्षाभ्यन्तरे ५६.८१% कथं स्यात् ? एतस्मात् सिद्धं यत् यथा संस्कृतजनाः लेखयन्ति तथा अन्यभाषाभाषिजनाः अपि कदाचित् कैश्चित् कारणैः स्वभाषां लेखयन्ति, कदाचित् न इति । यथा कर्णाटके वसन्तः केचन मराठीभाषिणः आग्रहपूर्वकं 'मराठी' इत्येव लेखयन्ति । केचन कर्णाटके वृत्तिः प्राप्तव्या इति हेतोः स्वभाषा कन्नडं न चेदपि 'कन्नड' इत्येव लेखयन्ति । चतुर्थे कोष्ठके (कोष्ठकम् - ४) दत्तस्य प्रतिशतवृद्धि-परिमाणस्य, [illegible]प्रतिशतजनसख्यावृद्धेः च परस्परं सामञ्जस्यं न भवति एव । अजगजान्तरम् अस्ति तयोः । किञ्च, भारतस्य आहत्य जनसख्यायां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

केवलायाः हिन्द्याः प्रतिशतपरिमाणे वृद्धिः अस्ति । १९९१ वर्षे ३६.९९% आसीत्, २००१ वर्षे ४१.०३% अभवत् । अन्यासां सर्वासां भाषाणां ह्रासः एव अभवत् ।

२०११ तमस्य वर्षस्य जनगणनायाः विषये इदानीम् आरभ्य एव अस्मदीयानां मानसिकता सज्जा करणीया । प्रजातान्त्रिकव्यवस्थायां संस्कृतेन आत्मरक्षार्थं स्वीयसंख्यावृद्धिः सम्पादनीया एव । अतः सर्वैः अपि संस्कृतभाषा स्वीया मातृभाषा इति लेखनीयम् । केचन जनाः, 'अन्याः भाषाः काः ज्ञायन्ते ?' 'कस्याः भाषायाः पठनं ज्ञायते ?' इत्यादीनां प्रश्नानाम् उत्तररूपेण 'संस्कृतम्' इति लेखितवन्तः । तेन प्रयोजनं न भवति । मातृभाषा इत्यत्र एव 'संस्कृतम्' इति लेखयितव्यम् ।

जनगणनायाः कार्यस्य सज्जता सर्वकारैः वर्षात् वर्षद्वयात् वा पूर्वमेव आरप्स्यते । तदा अस्माभिः सावधानैः भवितव्यम् । तत्सम्बद्धं कार्यालयं गत्वा तत्र पत्रकेषु सूच्यां संस्कृतस्यापि उल्लेखः भवेदिति, जनगणनाकार्यकर्तॄणां प्रशिक्षणसमये तेभ्यः योग्यदृष्टिदानं भवेदिति च अस्माभिः प्रयतनीयम् । अग्रिमः अवसरः अस्माकं हस्तच्युतः यथा न भवेत् तथा प्रयतनीयम् ।

तृतीयं कोष्ठकं (कोष्ठकम् - ३) दृश्यताम् । केषुचित् राज्येषु पुरुषाणां स्त्रीणां च अनुपातः योग्यरीत्या नास्ति । अग्रिमवारं महिलाः अपि इतोऽप्यधिकसख्यया यथा भवेयुः तथा यतनीयं स्यात् ।

जनगणनायां मातृभाषा संस्कृतमिति लेखनीयम् इत्येतावन्मात्रे एव अस्माकम् अनुरोधः न । वास्तविकरूपेण अस्माकं गृहभाषा संस्कृतभाषा करणीया । सा संस्कृतसरस्वती अस्माकं गृहे वाग्देवीरूपेण विलसेत् । संस्कृतभाषा भाषारूपेण एव मम भवतः च मुखे भवेत् । सदैव भवेत् ।

'तुरीयं वाचं मनुष्याः वदन्ति' इति वेदे उक्तम् अस्ति । 'पठन्ति' इति 'लिखन्ति' इति वा न उक्तम् । अतः सिद्धं यत् पूर्वं जनाः संस्कृतेन वदन्ति स्म एव इति । इदानीमपि वक्तव्यम् । भविष्येऽपि वक्तव्यम् । अतः भवन्तः कृपया संस्कृतेन भाषन्ताम् । प्रेम्णा, गर्वेण, विनयेन, सरलेन च संस्कृतेन एव भाषन्ताम् । □□

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१५.

माध्यमानाम् उपयोगः

कदाचित् अहं केनचित् ज्येष्ठेन सह भाषमाणः आसम् । सम्भाषणावसरे सः मां पृष्टवान् – ''किम् अद्यत्वे संस्कृतस्य प्रसारः वेगेन जायमानः अस्ति ?'' इति ।

अहं प्रतिपृष्टवान् – ''किमर्थं भवान् अमुं प्रश्नं पृष्टवान् ?'' इति ।

तदा तेन उक्तम् – ''अद्यत्वे अहं वार्तापत्रेषु पत्रिकादिषु च संस्कृतविषये बहुधा पठामि, अतः..'' इति ।

एतत्प्रसङ्गादारभ्य मम मनसि केचन विचाराः प्रचलन्ति । तान् अत्र भवद्भिः सह संविभक्तुम् इच्छामि ।

'लोकसभायाः विधानसभायाः वा निर्वाचनसमये कस्मै अभ्यर्थिने कस्मै दलाय च जनाः मतं यच्छेयुः ?' इति पृष्टे तज्ज्ञाः राजनीतिज्ञाः वदन्ति – 'पराजयं प्राप्नुवते अभ्यर्थिने दलाय वा कोऽपि मतं न ददाति । जयते अभ्यर्थिने जयते दलाय वा एव मतस्य दानं जनाः चिन्तयन्ति' इति । यथा निमज्जति उडुपे कोऽपि स्थातुं न इच्छेत्, प्लवमानां नौकाम् एव, अपरं पारं प्रति तरन्तीं नौकामेव सर्वः अपि आरोढुम् इच्छेत्, तथैव अस्ति संस्कृतपठनविषयः अपि ।

'भविष्यतः भाषा संस्कृतभाषा', 'जगति महता वेगेन वर्धमाना भाषा संस्कृतम्', 'अद्यतनसमस्यानां परिहारस्य दात्री

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतभाषा', 'अग्रिमे काले आधुनिकविषयाणां ज्ञानेन सह संस्कृतस्यापि ज्ञानं येषां भवेत् तेषामेव यशः भविष्यति', 'संस्कृतज्ञाः अग्रस्थानीयाः भविष्यन्ति', 'सर्वे संस्कृतं पठन्तः सन्ति', 'अत्र संस्कृतम् आगतम्', 'तत्र संस्कृतं पठन्तः सन्ति' (तर्हि अहमपि संस्कृतं पठिष्यामि) इत्येवंप्रकारेण यदा वयं जनमानसे भावनिर्माणं कर्तुं समर्थाः भवेम तदा संस्कृतभाषा वायुवेगेन वर्धिष्यते ।

समाजमानसे अद्य सर्वैः आद्रियमाणा पठ्यमाना च भाषा इति भावनिर्माणाय किञ्चन महत्त्वपूर्णं साधनं नाम 'माध्यम'(Media)पदेन निर्दिश्यमानानि वृत्तपत्र-पत्रिका-विद्युन्मान-जालपुट-अन्तर्जालादीनि । संस्कृतानुरागिभिः अस्माभिः कुशलतापूर्वकं प्रयत्नपूर्वकं च तेषां माध्यमानाम् उपयोगः करणीयः ।

प्रतिदिनं जनानां श्रुतिपथे दृष्टिपथे च संस्कृतम् आगच्छेत् । तदर्थम् उपायाः चिन्तनीयाः । यदा सर्वतः अपि संस्कृतसम्बद्धाः वार्ताः श्रूयेरन्, यदा वार्तापत्रिकादिषु संस्कृतविषयकाः वार्ताः पठ्येरन् तदा नूतनेषु संस्कृतपठनोत्साहः वर्धेत, संस्कृतज्ञेषु विश्वासः दार्ढ्यं प्राप्नुयात्, छात्रेषु संस्कृतप्रीतिः अङ्कुरिता भवेत् च ।

दैनिकवार्तापत्रेषु प्रान्तस्तरीयाः जनपदीयाः नगरीयाः च वार्ताः भवन्ति । प्रान्तीयानां वार्तापत्रेषु जनपदीयपृष्ठानि पृथक् भवन्ति, किञ्च सप्ताहे कतिपयदिनेषु शिक्षा-कृषि-विज्ञानादिरूपेण एकैकविषयस्य अतिरिक्तपृष्ठानि अपि भवन्ति । दैनिकवार्तापत्राणामेव साप्ताहिकविशेषपत्राणि अपि भवन्ति । एतेषु सर्वेषु संस्कृतसम्बद्धाः वार्ताः, स्तम्भलेखाः, चित्राणि, सूचनाः, सन्दर्शनानि, सुभाषितादीनि च आवर्षं पुनः पुनः भवितुम् अर्हन्ति, यदि वयं तदर्थं प्रयत्नं कुर्याम ।

प्रत्येकं कार्यक्रमस्य वार्तां सज्जीकृत्य वार्तापत्रेभ्यः सा प्रेषणीया । प्रमुखवार्तापत्राणां प्रतिनिधयः प्रतिनगरं भवन्ति । तैः सह स्नेहसम्बन्धं स्थापयेम चेत् तेषां माध्यमेन बहु साधयितुं शक्येत । वार्तानिर्माणम् अपि किञ्चन कौशलम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. कार्यक्रमस्य वैशिष्ट्यानां वर्णनस्य वार्ता
२. नगरस्य/जनपदस्य श्रेष्ठस्य संस्कृतविदुषः वैशिष्ट्यपरिचायिका वार्ता
३. कमपि छात्रविशेषं स्वीकृत्य तस्य द्वारा अष्टाध्याय्याः अमरकोषस्य वा कण्ठस्थीकरणं कारयित्वा तद्विषये वार्ता
४. समीपे विद्यमानस्य ताडपत्रसङ्ग्रहस्य, कस्यचन विशिष्टस्य ताडपत्रग्रन्थस्य वा परिचायिका वार्ता
५. जनपदस्य संस्कृतविद्यालयानां, विदुषां, छात्राणां, शिक्षणस्य च सामान्यं सर्वेक्षणं कृत्वा तद्विषये वार्ता
६. भवत्स्थानं प्रति संस्कृतभारत्याः प्रान्तीयपदाधिकारिणः आगमनावसरे वार्ता
७. पर्वविशेषप्रसङ्गे तस्य पर्वणः संस्कृतस्य च सम्बन्धं कल्पयित्वा वार्ता
८. संस्कृतभाषिबालविषये, संस्कृतगृहविषये, संस्कृतबालकेन्द्रविषये वा वार्ता

इत्येवं बहुविधाः वार्ताः निर्मातुं प्रसारयितुं च शक्याः ।

संस्कृतभारत्या प्रकाशितं 'Science In Samskrit' 'Pride of India' 'भुवमवतीर्णा भगवद्भाषा' इत्यादीनां बहूनां पुस्तकानां साहाय्येन लघून् लेखान् सज्जीकृत्य जनपदीयेभ्यः नगरीयेभ्यः वा वार्तापत्रेभ्यः दातुं शक्नुमः । प्रायः तादृशवार्तापत्राणां समीपे जनाभावतः लेखानाम् अभावः अपि भवति एव । अतः वयं लेखान् दद्याम चेत् अवश्यं प्रकाशयिष्यन्ति ताः पत्रिकाः । आवर्षं प्रकाशनं भवेत् एव । यदा यदा संस्कृतवार्ता प्राप्येत, प्रसङ्गः वा लभ्येत तदा सर्वदा वयं 'वाचकानां पत्राणि' इत्यस्मै विभागाय पत्रं लिखेम । साप्ताहिकी पाक्षिकी मासिकी इत्यादयः बह्व्यः पत्रिकाः भवन्ति । विविधानां सामाज़िकसांस्कृतिकधार्मिकसङ्घटनानां च मुखपत्रिकाः अपि भवन्ति । एतासु सर्वासु अपि संस्कृतानुकूलाः लेखाः यथा प्रकाशिताः स्युः तथा अस्माभिः प्रयतनीयम् । एकैकः अपि अस्मदीयः एतदर्थं चिन्तनस्य प्रारम्भं यदि कुर्यात् तर्हि बहवः उपायाः स्फुरेयुः, अनेके मार्गाः दृश्येरन् च ।

जनशक्तिः, धनशक्तिः, राजशक्तिः, ज्ञानशक्तिः इत्यादिषु शक्तिषु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

माध्यमशक्तिः अपि अन्यतमा । सा च अद्यतने काले सर्वसमर्था ! विशेषतया जनाभिप्रायरूपणे जनजागरणे जनान्दोलननिर्माणे च माध्यमशक्तेः महत्तम-भूमिका भवति । तस्मात् संस्कृतोज्जीवनाय अस्माभिः माध्यमशक्तेः सम्पूर्णोपयोगः चिन्तनीयः । तदर्थं माध्यमानां विषये अस्माकम् अध्ययनम् अपेक्षितम् । पत्रकारैः सह, वार्ताहरैः सह, सम्पादकैः सह च अस्माभिः मिलद्भिः भवितव्यम् । पत्रकारिताक्षेत्रे संस्कृतज्ञैः प्रवेशः कर्तव्यः ।

संस्कृतस्य प्रचारः भवेत् । संस्कृतकार्यस्य प्रचारः भवेत् । कार्यकर्तृगणस्य च प्रचारः भवेत् । परन्तु स्वस्य प्रचारः न भवेत् । संस्कृतस्य, संस्थायाः, कार्यस्य च प्रकाशनं नाम स्वस्य प्रकाशनं नैव । वार्तासु इतरेषां प्रदर्शनं भवेत्, स्वस्य न । एषा जागरूकता सदा भवेत् । तत्र कारणद्वयम् - स्वस्य प्रसिद्धिः यावती अधिका भवेत् तावता एव प्रमाणेन स्वस्य अहङ्कारः अपि अधिकः भवेत् । अपि च इतरेषां प्रचारः क्रियेत चेत् तेषां प्रोत्साहनं भवेत्, गणभावः च वर्धेत । स्वस्यैव प्रचारः स्वयमेव येन क्रियेत सः उपहासभाग् भवेत्, लाघवं प्राप्नुयात्, जनाः तस्मात् दूरं गच्छेयुः च ।

विभिन्नेषु दिनेषु विभिन्नासु पत्रिकासु संस्कृतसम्बद्धाः लेखाः आवर्षं प्रकाशिताः यदि भवेयुः प्रतिदिनं प्रतिसप्ताहं वा काचित् वार्ता कश्चन लेखः च यदि प्रकाशितः भवेत्, संस्कृतं सदैव चर्चायां यदि भवेत्, तर्हि जनानां तत्र अवधानं भवेत् । एवं कर्तुं सर्वैः संस्कृतज्ञैः मिलित्वा प्रयत्नः करणीयः । संस्कृतं वार्ताविषयः कथं भवेत् इति विषये संस्कृतमहाविद्यालयैः, विश्वविद्यालयैः चापि गभीरं चिन्तनं करणीयम् ।

जालपुटे इदानीं तु अधिकांशैः संस्कृतज्ञैः (मया अपि) आङ्ग्लभाषया लिख्यते । तत्रापि अस्माभिः संस्कृतेन लेखनस्य प्रारम्भः करणीयः । 'Blog' इति या व्यवस्था अस्ति तत्र वयं संस्कृतेन निरन्तरतया स्वीयान् विचारान् प्रकटयितुं शक्नुमः । संस्कृतज्ञानां परस्परव्यवहाराय संस्कृताध्येतॄणां ज्ञानवर्धनसाहाय्याय च वयं तत्र जालपुटे संस्कृतेन व्यवहारं कुर्याम । परन्तु बाह्यजगतः बोधनाय आङ्ग्लभाषया अपि लिखेम । अस्मत्परिचिताः अस्माकं विविधकक्षाणां छात्राः भूतपूर्वच्छात्राः च ये ये आङ्ग्लादिभाषाभिः जालपुटेषु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लिखन्ति ते सर्वे संस्कृतविषये यथा लिखेयुः तथा ते अस्माभिः प्रेरणीयाः ।

लेखकाः पत्रकाराः च संस्कृतानुरागिणः बहवः सन्ति । परं तेषां संस्कृतविषये अधिकं ज्ञानं न भवति । यदि अस्माभिः तैः सह मिलित्वा तेभ्यः विषयाः दीयेरन् तर्हि ते अवश्यमेव अस्मदपेक्षितान् लेखान् लिखेयुः एव । संस्कृतस्य प्रचाराय माध्यमानाम् उपयोगः कथं करणीयः इत्येषः विषयः अस्माभिः सर्वैः अवगन्तव्यः चेत् प्रतिराज्यं स्थाने स्थाने संस्कृतज्ञेभ्यः कार्यकर्तृभ्यः तद्विषयकप्रशिक्षणात्मिकाः कार्यशालाः अनुभविनां पत्रकाराणां द्वारा आयोजनीयाः ।

अद्यावधि वयं प्रचारतः दूरे आस्म । तत्र कारणानि अपि आसन् । तेन प्रसिद्धिपराङ्मुखत्वेन लाभाः अपि अभवन् । परम् इदानीं समयः आगतः अस्ति पुनश्चिन्तनाय । स्वयम् अस्माकं गुणसंस्कारान् अनाशयित्वा, कस्मिन् अपि जने स्वप्रचारेच्छा यथा न उत्पद्येत तथा जागरूकतां वहन्तः, कार्यकर्तॄणां प्रसिद्धिप्रियतां विना संस्कृतस्य विषये प्रचारः यथा अधिकाधिकं भवेत्, प्रतिनगरं प्रतिस्थानं संस्कृतसम्बद्धाः वार्ताः प्रतिदिनं यथा स्युः तथा कर्तुम् अवश्यमेव प्रयत्नः कर्तव्यः ।

वयं माध्यमस्य महत्त्वम् अवगच्छेम । स्वीयं पत्रं, पुष्पं, फलं, तोयं च समर्पयेम ! प्रतिवर्षं त्रिचतुरान् वा लेखान् लिखेम !!

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतस्य लेखकस्य अन्याः कृतयः

- सङ्क्रमणम्
- ज्ञाने धर्मः उत प्रयोगे ?
- संस्कृतम् - स्वाट् असेस्मेण्ट्
- परिवर्तनम्
- संस्कृतभारती
- उत्तिष्ठत ! मा स्वप्त !!
- सप्तदशी
- परिष्कारः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

ISBN 978-81-87276-18-7

रू. २०.००